

सितम्बर तः अक्टूबर २०१९ पर्यन्तम्
(वै.२०७६)
भाद्रपद-शुक्लपक्ष-द्वितीयातः कार्तिक-शुक्ल-चतुर्थी पर्यन्तम्

ISSN:2347-1565
मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् - ७ संयुक्ताङ्कः २-३

(कथाविशेषाङ्कः)

सम्पादकः
डॉ. जीतराम भट्टः
सचिवः

# "संस्कृत मञ्जरी"

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

## "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २३६८१८३५**

आई०एस०एस०एन०-2347-1565 मूल्यम्- ₹ २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

(कथा-विशेषाङ्कः)
वर्षम्-७ संयुक्ताङ्कः २/३
(सितम्बर तः अक्टूबर २०१६ पर्यन्तम्)
(वै०.२०७६)
(भाद्रपद-शुक्ल-द्वितीयातः कार्तिक-शुक्ल-चतुर्थी पर्यन्तम्)

सम्पादकः
डॉ. जीतराम भट्टः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः
डॉ. आशुतोषदयाल माथुरः
डॉ. पंकजा घई
डॉ. पूर्वा भारद्वाजः
डॉ. धनञ्जयमणि त्रिपाठी

| क्र. सं. | अनुक्रमणिका | | पृष्ठ संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | कर्मणां फलम् | सुश्री आराधना मिश्रा | १ |
| ३. | न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति | डॉ. योगिनी एच व्यासः | ५ |
| ४. | संघर्षमेव मनुष्याणां पथप्रदर्शनं करोति | सुश्री नेहा मिश्रा | ८ |
| ५. | जीवनस्य साफल्यम् | सुश्री मीनू बाला मल्होत्रा | १० |
| ६. | संघर्षः | डॉ. राकेशः शास्त्री | १३ |
| ७. | मेधाविनी विशाखा | डॉ. रामकुमारः शर्मा | १७ |
| ८. | प्रत्यावर्तनम् | डॉ. आभा झा | २० |
| ९. | परोपकारवैभवम् | डॉ. धनंजयवासुदेवः द्विवेदी | २४ |
| १०. | परिश्रमशीलौ विद्या-वीरसिंहौ | सुश्री अनुराधा | २७ |
| ११. | सं वो मनांसि जानताम् | श्री राहुलकुमारः | ३१ |
| १२. | धनस्य सदुपयोगः | पं.सत्यवीर शास्त्री | ३३ |
| १३. | पिहितं सूर्यबिम्बम् | श्री दत्तात्रेयः अनन्त उपाध्ये | ३७ |
| १४. | उत्तरदायित्वम् | श्री विश्वजितप्रामाणिकः | ४१ |
| १५. | परिवर्तनप्रतीतिः | डॉ. सुधाकरमिश्रः | ४९ |

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)

प्रकाशकः
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं0-5, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005
दूरभाषः - 011-23635592, 23637798

सदस्यताशुल्कम्

प्रति-अङ्कम् : २५ रूप्यकाणि

वार्षिकम् : २५० रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः ( डी0डी0 ), डाकधनादेशः ( मनिआर्डर ) अथवा सी0टी0सी0 चैक माध्यमेन ( दिल्लीसंस्कृतअकादमीपक्षे )

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः
एस.डी.एम. प्रिन्टर एण्ड पैकर
हरिनगरम्, नव देहली-११००६४
मो. : ९८११२२९५२९

# सम्पादकीयम्

भौतिकविकासक्रमे संसाधनानामर्थोपार्जनस्य च प्रवृत्त्या मानवेषु मानवोचितगुणाः शनैः शनैः क्षीयन्ते। अनेन लोके परस्परं विश्वासस्याभावः पारिवारिकमूल्यानां ह्रासः जीवनमूल्यानामुपेक्षा च परिदृश्यते। समाजे साहचर्यं सहिष्णुता प्रेम सहयोगः संगतिश्च प्रायः नैव दृश्यते। प्रतीयते यद् भौतिकचिन्तनेन मनुष्यः सर्वथा स्वार्थी सञ्जातः। अतएव समाजे भ्रष्टाचारः, कदाचारः अत्याचारः व्यभिचारश्च सर्वत्र दृश्यन्ते। सामाजिक-वैषम्यायेयं भौतिकीदृष्टिरेव कारणभूताऽस्ति। मनुष्यः यन्त्रवत्कार्यं करोति। परस्मै संवेदना लुप्तप्राया जाता केवलं वृत्तिप्रधाना शिक्षैव महत्त्वपूर्णा जाता मानवोचित-गुणानां विकासाय शिक्षायां नास्ति विशिष्टः कोऽपि विषयः। संस्कृतमपि केवलं भाषारूपे एवास्ति। संस्कृतशास्त्रेषु विद्यमानानां जीवनमूल्यानां शिक्षा छात्रान् प्रेरयितुं समर्थाऽस्ति। लोके मानवोचितगुणविकासाय संस्कृतशास्त्रानुशीलनाय निवेदयत्ययं जनः।

सुमनसां प्रतिभाप्रतिभासिका
क्षितितलात्तमसश्च विनाशिका।
शिशुकिशोरयुवप्रियसाधिका
विजयते भुवि संस्कृत-चन्द्रिका॥

निवेदकः

डॉ.जीतरामभट्टः

सचिवः

# कर्मणां फलम्

-आराधना मिश्रा

आसीदेक: कृषक:। तस्य चत्वार: बालका: आसन्। कृषकस्य भार्या नासीत्। कृषक: कृषिकर्मं कृत्वा बालकान् पोषयति स्म। सोऽसौ स्वयं भोजनं निर्माय बालकान् भोजयति स्म। स्वयमल्पमपि भुञ्जान: पूर्णाहारेण परिपूरयदात्मन: पुत्राणामुदरम्। कृषकस्य सर्वे बालका: कालक्रमेण शनै: शनै: युवान: सञ्जाता: उच्चशिक्षां प्राप्तुं नगरं प्रति संपूरिता सञ्जाता। चत्वारोऽपि पुत्रा: पुरुषार्थारतिक्रम्यवृत्तिं अलभन्त। कृषकस्य ज्येष्ठपुत्र: अध्ययनं समाप्य अभियन्ता सञ्जाता:। द्वितीय: पुत्र: नगरक्षक: सञ्जात:, तृतीयश्च नगरे वणिग्वृत्तिं स्वीकृतवान्। चतुर्ष्वपत्येषु तुरीय: पुत्र: यद्यप्यासीद् संस्कृतविद्यां निपुण: शिक्षितश्च तथापि नालभत कामपि नगरे वृत्तिं। असौ ग्रामे पितु: पार्श्वे आगत्य पितु: कृषिकर्मणि साहाय्यं विदधाति स्म। ग्रामस्य बालकान् अपि पाठयति स्म। कृषकस्य य: पुत्र: अभियन्ता आसीद् स: नगरे एव कामपि मनोनीतां कन्यां जायारूपेण स्वीकृतवान्। कृषकस्य पुत्रोऽसौ यदा कदा ग्रामे पितु: पार्श्वे आगत्य स्वकीयाद् उपार्जिताद् द्रव्याद् किञ्चिद् द्रव्यं दत्वा पुन: नगरे एव प्रयाति स्म। य: नगररक्षक: पुत्र: आसीत् स उत्कोचेन अर्थोपार्जनं करोति स्म। यश्च तृतीय: पुत्र: व्यापारे संसक्त आसीद् तस्यापि आचरणं सम्यक् नासीत्। स: आपणे स्थितेषु खाद्यपदार्थेषु अखाद्यपदार्थानां सम्मिश्रणं दूषितान् विधीम् आपणे प्रत्यहं विक्रयं करोति स्म। य: कृषकस्य तुरीय: पुत्र: आसीत् तस्य आचरणं अत्यन्तं शोभनं आसीत्। स ग्रामस्य अनेकान् बालकान् पाठयति स्म। पितु: कार्येषु सहयोगम् अपि विदधाति स्म। असौ पुत्र: पिता सह मधुरवचनेन वार्तालापं कुर्वन् पूर्णमनोयोगेन सेवामापि करोति स्म। तस्य ग्रामस्य एव कन्यया सह पाणिग्रहणम् अभवत्।

कृषक: कालक्रमेण वृद्ध: सञ्जात:। तस्य कृषिकर्मे नासीत् तथाविधं सामर्थ्यं शरीरस्य क्षीणत्वात्। कृषकोऽसौदैनन्दिनं कृत्यं भोजनादिकञ्च कृत्वा ग्रामवृद्धै सह वार्तालापं करोति स्म। एकस्मिन दिने मनसि स: विचारितवान्। कथं न अहं ज्येष्ठपुत्रस्य पार्श्वे गत्वा महानगरं भ्रमणं करवाणि इति विमृश्य स: ज्येष्ठपुत्रस्य गृहं गतवान्। कृषक: असौ पुत्रस्य विशालं भवनं दृष्ट्वा अत्यन्तं प्रसन्न: सञ्जात:। पुत्रोऽपि पितरं नमस्कृत्य हर्षेण स्वागतं कृतवान्। तदनन्तरं ग्रामस्य सम्पूर्णवृत्तान्तम् अपृच्छत्। पितु: ग्रामस्य वृत्तान्तं श्रुत्वा किञ्चित कालान्तरं पुत्र: पितरं अपृच्छत् हे-पित:! केन कारणेन भवन्त: नगरं प्रति आगतवन्त:। किं भवत: पार्श्वे द्रव्यं नास्ति? कृषक: उक्तवान्-पुत्र! मम पार्श्वे द्रव्यं अस्ति परन्तु मम आकांक्षास्ति किञ्चित् कालपर्यन्तं त्वया सह नगरे एव वासं करिष्यामि। त्वया सह नगरभ्रमणञ्च करिष्यामि। एतदर्थं अहं ग्रामाद् नगरं प्रति आगतवान्। तस्मिन् काले असौ पुत्रस्य भार्याऽपि तत्रैव आसीद्। पितु: वचनं श्रुत्वा पुत्र: स्वकीयां भार्याम् अपश्यत्। भार्याऽसौ दृष्ट्या संकेतेन पितु: प्रस्तावं निषेधं कृतवती तदनन्तरं पुत्र: अवदत्-पितु: किञ्चित् द्रव्यं स्वीकृत्य गृहं गच्छतु। अस्मिन् नगरे प्रदूषणं वर्तते। भवत: अवस्थापि भ्रमणयोग्या नास्ति इतोऽपि-

**सुलध्वस्ति गृहं तात रिक्ता काऽपि न मेदिनी।**
**जलपानादिकं कृत्वा ग्रामं सम्प्रति गच्छतु॥**

स्वकीयस्य पुत्रस्य इदं वाक्यं श्रुत्वा कृषकः मनसि चिन्तितवान् सम्प्रति मया किं करणीयम्। यदि ग्रामं गमिष्यामि तर्हि ग्रामीणः पृच्छन्ति भवान् केन कारणेन त्वरितं पुत्रगृहात् आगतवान्। मत्कथमनन्तरं पुत्रस्य निन्दा भविष्यति, अतः अस्मिन् काले ग्रामं प्रति गमनम् उचितं नास्ति। तर्हि मया कुत्र गन्तव्यम्। कथं न अहं द्वितीयः पुत्रस्य पार्श्वे गच्छेयम् इति विचार्य कृषकः द्वितीयपुत्रस्य द्वारं गत्वा पुत्रं आहूतवान्। तस्मिन् काले पुत्रः नासीत्। गृहे तस्य भार्या आसीत्। असौ वृद्धस्य वचनं श्रुत्वा गृहात् बहि वृद्धं दृष्ट्वा तस्याः मनसि अवबोधः सञ्जातः एषः कोऽपि भिक्षुकः अस्ति। अत एव सा उक्तवती सम्प्रति मम पार्श्वे अल्पमपि द्रव्यं नास्ति। त्वम् अन्यं गृहं प्रति गच्छतु। असौ कृषकः अवदत्-वधू! अहं तव श्वसुरः अस्मि भिक्षुकः नास्मि। तदन्तरं तस्याः मनसि बोधः सञ्जातः एषः मम श्वसुरः अस्ति। तस्मिन् एव काले कृषकस्य पुत्रोऽपि आगतवान्। पुत्रः पितरं पश्यन् तस्य चरणस्पर्शं कृत्वा जलपानादिकं दत्त्वा अवदत् भवन्तः अत्रैव विश्रामं कुर्वन्तु इति उक्त्वा सः स्वकीया भार्याया सह प्रकोष्ठं प्रति गतवान् । प्रकोष्ठे भार्या स्वकीयं पतिम् अपृच्छत् भवतः पिता कति कालपर्यन्तं अत्र स्थास्यति पुत्रः उक्तवान् सम्भवतः श्वः दिवसे ग्रामं गमिष्यति। पुनः द्वौ पितरं पार्श्वे आगतवन्तौ पुत्रः किञ्चित्कालं वार्तालापं कृत्वा पितरम् अपृच्छत् भवन्तः ग्रामं कदा गमिष्यति? पुत्रस्य वाक्यं श्रुत्वा कृषकः अवदत् मम तु इच्छास्ति किञ्चित् कालपर्यन्तं त्वया सह अत्रैव गृहे स्थास्यामि, एतदर्थं तव गृहे आगतवान्। पुत्रः अवश्यमेव तिष्ठतु। एतद् गृहं भवतः एव वर्तते। पुत्रस्य इदं वचनं श्रुत्वा हर्षेण शयनगृहं प्रति गतवान्। पुत्रस्य भार्याऽपि शयनगृहं गतवती परन्तु कोपेन अनन्तरं पुत्रोऽपि भार्यायाः अनुसरणं कृतवान्।

कृषकः पुत्रस्य गृहे आनन्देन वासं करोति स्म। वधूः यदन्नं ददाति तमेव भुक्त्वा किञ्चिकालं शयनं करोति स्म। पुत्रस्य गृहाद् बहिः किञ्चित् रिक्तं क्षेत्रं आसीत् तस्मिन् क्षेत्रे असौ शाकादिकानाम् उपार्जनं करोति स्म। यदा कदा पुत्रेण सह नगरस्य भ्रमणं अपि करोति स्म। येन प्रकारेण सः पुत्रस्य गृहे तिष्ठति स्म। एकस्मिन् दिवसे रात्रौ पुत्रस्य भार्या स्वकीयं भर्तारम् अपृच्छत्। किं भो भवतः पित्रे कदा कालपर्यन्तं रोटिकां निर्माय भोजयिष्यामि? श्वसुरः कदा ग्रामं गमिष्यति? वचनं श्रुत्वा पुत्रः उक्तवान्, अहमपि चिन्तयामि पिता कदा ग्रामं गमिष्यति। किञ्चित् कालपूर्वं अहं पितरं अपृच्छम् अपि भवतः स्मृतिपथि ग्रामो न आगच्छति तदनन्तरं पिता उक्तवान् वध्वाः स्नेहेन अहं ग्रामं विस्मृतवान्। भार्याः चिन्तितवती वृद्धः इत्थं उक्तवान् तर्हि अधुना मम कोपेन एतत् गृहं विस्मरिष्यति। पुत्रः-क्रोधं मा करोतु। कोऽपि उपायं चिन्तयतु येन प्रकारेण असौ गृहात् बहिः गच्छेतद्।

भार्या – उपायः अस्ति।

पुत्रः – तर्हि वदतु।

भार्या तस्य कर्णे उक्तवती। तदनन्तरं तौ शयनार्थं गतवन्तौ। अपरस्मिन् दिवसे प्रातः काले पुत्रस्य कोलाहलेन अवदत् मम अङ्गुलीयकम् कुत्र अस्ति। पुत्रः कथितवान् भवत्याः अङ्गुलीयकम् भवत्याः पार्श्वे एव आसीत्।

भार्या- परन्तु सम्प्रति मम पार्श्वे नास्ति।

पुत्रः - सम्यक्रूपेण अन्वेषणं कुरु कस्मिन् प्रकोष्ठे भविष्यति।

भार्या- अहं सर्वत्र अन्वेषणं कृतवती। कुत्रापि नास्ति। केवलं पितुः प्रकोष्ठे अन्वेष्णं न कृतवती।

तस्मिन् काले कृषकोऽपि तत्रैव आसीत्। सः त्वरितं उक्तवान् त्वं मम प्रकोष्ठेऽपि अन्वेषणं कुरु। कृषकस्य वचनं श्रुत्वा पुत्रस्य भार्या अविलम्बेन कृषकस्य प्रकोष्ठे गतवती। किञ्चित् कालानन्तरं स्वकीयं अङ्गुलीयकं हस्तयोः स्थापयित्वा कृषकस्य प्रकोष्ठात् बहिः आगतवती। भार्यायाः हस्तयोः अङ्गुलीयकं दृष्ट्वा पुत्रः अपृच्छत्- एतत् अङ्गुलीयकम् कुत्र आसीत्। भार्या क्रोधेन उक्तवती। एतत् अङ्गुलीयकम् भवतः पितुः स्यूते आसीत्। एषः वृद्धः मम अङ्गुलीयकम् चोरितवान्। वध्वाः इदं वाक्यं श्रुत्वा कृषकः उक्तवान् अहं न जानामि, एतत् अङ्गुलीयकम् केन प्रकारेण मम स्यूते आगतम्। भार्या उक्तवती किं अङ्गुलीयकस्य चरणं वर्तते याभ्यां चरणाभ्याम् अङ्गुलीयकं तव प्रकोष्ठं गतवान्। त्वमेव मम अङ्गुलीयकं चोरितवान्। तात! मिथ्या मा वदतु। कृषकः करुणस्वरेण उक्तवान् अहं सत्यं वदामि अहं भवत्याः अङ्गुलीयकं न चोरितवान्। एतत् तु अङ्गुलीयकम् मम स्यूते केन प्रकारेण आगतम् अहं स्वयं न जानामि। पित्रस्य वचनं श्रुत्वा पुत्रः उक्तवान्-

**प्रकोष्ठे मम चौरार्थं नास्ति जलपानादिकम्।**
**पितः! स्थानमिदं त्यक्त्वा ग्रामं सम्प्रति गच्छतु॥**

पुत्रस्य वाक्यं श्रुत्वा कृषकः उक्तवान् यदि तव ममोपरि विश्वासो नास्ति तर्हि अहं तव गृहे किञ्चित्कालं अपि न तिष्ठामि इत्युक्त्वा स कृषकः पुत्रस्य गृहात् प्रस्थानं कृतवान्। कृषकः मार्गे चिन्तितवान् मया सम्प्रति कुत्र गन्तव्यम् । यदि एतादृशीम् अवस्थां स्वीकृत्य ग्रामे गमिष्यामि तर्हि पुत्रस्य निन्दा भविष्यति। अतः सम्प्रति यः मम वणिग् पुत्रोऽस्ति तस्य पार्श्वे गमिष्यामि। तस्य पार्श्वे किञ्चित् कालं स्थित्वा पुनः ग्रामं गमिष्यामि। तदनन्तरं सः तृतीयस्य पुत्रस्य द्वारं गतवान्। असौ वणिग्पुत्रः पितरं दृष्ट्वा तस्य चरणयोः स्पर्शं कृत्वा आसनादिकं दत्तवान्। किञ्चित् कालपर्यन्तं पुत्रः पितुः नगरं प्रति आगमनस्य करणं अपृच्छत्। कृषकः उक्तवान् त्वया सह तव गृहे वासस्य आकांक्षा वर्तते अत एव तव गृहं आगतवान्। पुत्रः पितुः इदं वाक्यं श्रुत्वा किञ्चित्कालं इत्थं विमृश्य यदि मम पिता मम पार्श्वे स्थास्यति तर्हि मम कोऽपि लाभो भविष्यति। पिता प्रतिदिनं भोजनं करिष्यन्ति अपरञ्च काले-काले भ्रमणार्थं धनमपि याचयिष्यति। सः यदा कदा रुग्णो भविष्यति तर्हि द्रव्यस्य अपव्ययम् अपि भविष्यति, अत एव पितुः पार्श्वे वासोऽपि मम कृते उपयुक्तो नास्ति। इति विमृश्य पुत्रः पितरं प्रति उक्तवान्-

**अहमस्मि वणिग्तात यत्र तत्र गमिष्यामि।**
**अहं गृहे न तिष्ठामि सम्प्रति ग्रामं गच्छतु॥**

पुत्रस्य वाक्यं श्रुत्वा कृषकः ग्रामं प्रति अगच्छत्। सः मार्गे चिन्तितवान् अहं आत्मनः सर्वेषाम् बालकानां पालितवान् परन्तु माम पालनस्य सामर्थ्यं कस्यापि पुत्रेषु नास्ति। येन प्रकारेण चिन्तयन् कुर्वन

ग्रामं सम्प्राप्तम्। ग्रामे तस्य कनिष्ठः पुत्रः आसीत् सोऽसौ पुत्रः हर्षेण तस्य चरणयोः स्पर्शं कृत्वा अवदत्-

**शून्यमासीद् गृहं एतत् पूरितं ते समागमे।**
**नित्यमत्रैव तिष्ठतु कदा कुत्रो न गच्छतु॥**

पुत्रस्य एतादृशं वाक्यं श्रुत्वा कृषकस्य नेत्राभ्याम् अश्रुधारा प्रवाहिताऽभूत्। कृषिकोऽसौ आनन्देन आत्मनः पुत्रस्य आलिङ्गनं कृतवान्। तदनन्तरं पुत्रः जलपानादिकं दत्वा पितुः वृत्तान्तं अपृच्छत्। पिता आत्मनः त्रयाणां पुत्राणं व्यवहारं कनिष्ठपुत्रं प्रति उक्तवान्। पुत्रोऽसौ आत्मनः भ्रातृणाम् एतादृशं व्यवहारं श्रुत्वा अत्यन्तः कुद्धोऽभवत्। तस्य मनसि स्वकीयस्य भ्रातृणां प्रति जुगुप्सा जाता। स विनीतभावेन पितरं प्रति उक्तवान्-भवन्तः अत्र वासं करोतु अहं भवतः शुश्रूषा करिष्यामि। येन प्रकारेण कृषकः कनिष्ठपुत्रस्य पार्श्वे स्थित्वा आनन्दं अनुभवतिस्म। सः पुत्रः दशवादनतः पञ्चवादनपर्यन्तं गृहं गृहं गत्वा बालकान् पाठयतिस्म। अनन्तरम् आपणं गत्वा शाकादिकं अनयत् अनन्तरं रात्रौ पितुः समीपं उपविश्य वार्तालापं कुर्वन् शुश्रूषां करोतिस्म। पञ्चमासानन्तरं प्रातः काले कृषकस्य ज्येष्ठपुत्रः तस्य पार्श्वे आगतवान्। पुत्रं दृष्ट्वा कृर्षकः कोपेन उक्तवान्-भो पुत्र! मम पार्श्वे द्रव्यम् अस्ति। भवतः द्रव्यस्य आवश्यकता नास्ति। पितुः वाक्यं श्रुत्वा पुत्रोऽसौ अवदत्-पितः! मां क्षम्यताम्। यदा अहं भवतः अपमानं कृतवान् तदनन्तरं मम गृहं अग्निना भस्मं सञ्जातं सम्प्रति अहं पदच्युतोऽपि अस्मि। मम कुटुम्बस्य पोषणाय गृहे अन्नमपि नास्ति। अत एव भवतां पार्श्वे क्षमायाचनार्थम् आगतवान्। तदनन्तरं द्वितीयः पुत्रस्य भार्या रुदन् आगतवती। सा श्वसुरं प्रति उक्तवती यदा भवान् मम गृहात् गतवान् तस्मिन् एव रात्रौ मम गृहे चौराः आगताः। तै अस्माकं सम्पूर्णं आभूषणं धनञ्च चोरितम् तदनन्तरं भवतः पुत्रोऽपि उत्कोचं गृह्ण प्रशासनेन निरुद्धः। सः सम्प्रति बन्दिगृहे अस्ति। किञ्चित् कालानन्तरं तृतीयश्च पुत्रोऽपि रुदन् आगतवान्। सः पितुः पार्श्वे आगत्य उक्तवान् पितः! कस्मिन्नपि स्थाने मां गोपयतु। यतो हि मम पश्चात् रक्षिणः सन्ति। ते रक्षिणः मां गृहीत्वा ताडनं करिष्यन्ति। अत एव पितः! मां रक्षतु। पुत्रस्य वचनं श्रुत्वा कृषकः उक्तवान् किं भो! तव रक्षिणः कथं अन्वेषणं कुर्वन्ति। पुत्रः उक्तवान् अहं खाद्यपदार्थेषु अखाद्यपदार्थानां मिश्रणं कृत्वा आपणे विक्रयं कृतवान् । एतदर्थं मां रक्षिणः इच्छन्ति। कृषकः आत्मनः पुत्राणां एतादृशां वृतान्तं श्रुत्वा दुःखेन अवदत् मम परिवारस्योपरि कस्य देवस्य प्रकोपः आगतवान्। तस्मिन् काले कृषकस्य लघुपुत्रोऽपि तत्रैव आसीत् सः उक्तवान् मम भ्रातृषु कस्यापि देवस्य प्रकोपः नास्ति। एते सर्वे जनाः भवतः तिरस्कारं कृतवान् एतदर्थं एतेषाम् एतादृशी अवस्था जाता। कृषकः उक्तवान् एते मम पुत्राः सन्ति। अत एव किमपिपरिष्कारं चिन्तयतु येन एतेषाम् सम्पूर्णं दुःखं समाप्तं भवेत्। लघुपुत्रः उक्तवान् पितः। भवतः तिरस्कारेण एतेषां एतादृशी अवस्था आगता। अतः एतेषां दुःख भवतः शुश्रूषया एव नष्टं भविष्यति कनिष्ठभ्रातुः एव वाक्यं श्रुत्वा तस्य भ्रातरः ग्रामेनिवसन्तः आत्मनः पितुः सेवां कृतवन्तः तदनन्तरं कृषकस्य पुत्राणां दुःखं समाप्तं सञ्जातम्।

**-संस्कृतविभागः, कला संकायः**
**काशी हिन्दूविश्वविद्यालयः, वाराणसी,**
**उत्तरप्रदेशः - २२११००५**

# न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति

**-डॉ. योगिनी एच व्यासः**

भारतवर्षस्य उत्तरप्रदेशे एकं समृद्धं नगरम् अस्ति। अस्मिन् नगरे वर्षाकाले पर्जन्यदेवस्य परमः अनुग्रहः वर्तते। तेन नगरस्य प्रायः सर्वे जनाः जीवननिर्वाहाय स्वां स्वां आजीविकां शान्तिपूर्वकं प्राप्नुवन्ति स्म। उत्सवप्रसङ्गेषु, सामाजिकप्रसङ्गेषु च सर्वे जनाः साहचर्येण, स्नेहबुद्धिपूर्वकं, आनन्दोल्लासपूर्वकं च अनुष्ठानं कुर्वन्ति स्म।

अत्र एकस्मिन् प्राङ्गणे धनवैभवसमृद्धाः परिवाराः अपि निवसन्ति स्म। तेषु एकः कस्तूरमहाभागस्य परिवारः सत्यपि ऐश्वर्यसम्पन्ने संस्कारपूर्णः आसीत्। कस्तूरमहाभागस्य मित्रोपकरणम् आत्मा, बान्धवोपकरणं लक्ष्मीः, कृपणोपकरणम् ऐश्वर्यम्, सुकृतसंस्मरणोपकरणं हृदयम्, धर्मोपकरणमायुः। तस्य विषये एतत् सुभाषितं सत्यमेव आसीत् यत्-

**अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम्।**
**सदा लोकहिते रक्ता रत्नदीपा इवोत्तमाः॥**

तस्य भार्या श्रीमती अर्चनादेवी गृहागतानां सर्वेषां अतिथिजनानां स्वागतं प्रीतिपूर्वकं करोति स्म। सङ्कटप्रसङ्गे नगरस्य दरिद्रतायुक्तजनान् आर्थिक सहाय्यम् अपि करोति स्म। गृहस्थजनयोः विषये पुत्रमहात्म्यम् अधिकृत्य पद्मपुराणे उक्तमस्ति यत्-

**यः पुत्रो गुणवान् ज्ञाता पितरं पालयेच्छुभः।**
**मातरं च विशेषेण मनसा कामकर्मभिः॥**
**तस्य भागीरथीस्नानमहन्यहनि जायते।**
**अन्यथा कुरुते यो हि स पापीयान्न संशयः॥**

मनुस्मृतिग्रन्थेऽपि पुत्रविषये उक्तमस्ति यत्-

**पुंनाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।**
**तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥**

अनयोः दम्पत्योः तनयः अनिलः अपि स्वपितुः व्यापारकार्ये पुरस्करोति स्म। रूपशीलमाधुर्य-सम्पन्ना एका दुहिता 'माधवी' अपि विश्वविद्यालयस्य विनयनप्रवाहे अध्ययनं करोति स्म। इत्थं सम्पूर्णपरिवारः यथासुखं अध्यवसत्।

महाकविना कालिदासेन स्वकीय 'मेघदूते' उक्तमस्ति यत्-

**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।**

एकदा असह्यया शिरोवेदनया पीडितः कस्तूरमहाभागः चिकित्सालये औषध्यर्थं वैद्यस्य समीपम् अगच्छत्। सः वैद्यस्य औषधीनां अष्टमासपर्यन्तं सेवनं अकरोत्। तथापि तस्य स्वास्थ्यविषये किञ्चित् परिवर्तनं न जातम्। अतः रोगेन त्रस्तः सः स्वकीयं सम्भूयकारीजनं (Business Partner) आहूय अकथयत्- भो तिलकचन्द महाभाग! भवन्तः अस्माकं जनपदानां तथा अभितः परितः जनपदनिवासीजनानां पुरतः विघोषणां कुर्वन्तु यत् यः कोऽपि जनः कस्तूरमहाशयस्य व्याधेः परिशोधनं कृत्वा तं पुनर्स्वास्थ्ययुक्तं करिष्यति, सः अभिलषितं पुरस्कारं प्राप्स्यति।

समीपजनपदे किशन नाम्नः एकः नवयुवकः प्रतिवसति स्म। सः विविधेषु वनेषु वा जङ्गलेषु परिभ्रमणं कृत्वा रोगोपयोगीवनौषधीनाम् अन्वेषणं परीक्षणं च करोति स्म। वैद्यप्रशंसाविषये संस्कृतसाहित्ये उक्तमस्ति यत्-

**गुरोरधीताखिलवैद्यविद्यः पीयूषपाणिः कुशलः क्रियासु।**
**गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात्।।**
**रागादिरोगान्सततानुषक्तानशेषकायप्रसृतानशेषान्।**
**औत्सुक्यमोहारतिदाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै।।**

किशनेन स्वमित्रद्वारा कस्तूरमहाशयस्य वृत्तान्तः ज्ञातः। सः मनसि एव निश्चयं अकरोत् यत् स्वयं उत्तरप्रदेशं गत्वा कस्तूरमहाशयस्य शूश्रूषया- औषधीभिः उपचारं चिकित्सनं च कृत्वा तं पुनः रोगमुक्तं शरीरकुशलं च करिष्यति।

अपरेद्युः सः स्वग्रामात् अचिरेण निर्गत्य कस्तूरमहाशयस्य सदनं आगच्छत्। सदनस्य किङ्कराः तं शयनखण्डे स्वामिनः समीपं नीतवन्तः। किशनः तं विनयपूर्वकं प्रणम्य अकथयत् यत् तस्य भेषजोपचारार्थं सः आगतः। प्रथमं कस्तूरमहाभागस्य नाडीपरीक्षणं, हृदयस्फुरणपरीक्षणं, जिह्वापरीक्षणादीं कृत्वा वनौषधीभ्यः औषधीयद्रव्यमिश्रणं कृत्वा आर्यमिश्राय तम् औषधं मासत्रयपर्यन्तं समर्पयत्। किशनस्य निर्व्याजशुश्रूषया दाक्षिण्येन च दिनेषु गच्छत्सु स महाजनः सुष्टुपरिणामम् अनुभवति स्म। किशनेन प्रतिज्ञातं यत् आर्यः क्षिप्रं पूर्ववत् स्वस्थः भविष्यति। एषा सूक्तिः प्रसिद्धा अस्ति यत्-

**'अरक्षितं तिष्ठति दैवरक्षितम्। '**

पञ्चमासानां पश्चात् निवृत्तरोगः आर्यमिश्रः किशनं अवदत्- 'भो नवयुवक! व्याधिकारणात् मृतःप्रायभूताय मह्यं त्वया जीवनदानं प्रदत्तम् अस्ति। अतः पुरस्काररूपेण प्रीतः अहं मम व्यापारस्य अर्धं भागं तुभ्यं दातुमिच्छामि। मम कन्यायाः पाणिग्रहणं त्वया सह कर्तुमिच्छामि।'

किशनः सविनयम् प्रत्यवदत्- 'भो कुलीनजन! क्षम्यताम्। भवतां बहुमानस्य अस्वीकारं करोम्यहम्। कस्तूरमहाभागः अस्वीकृतेः कारणं अपृच्छत्। सः अकथयत्-'भो महाजन्! भवान् मत्कौशल्येन प्रीतः अस्ति। भवतः दुहितां मया सह पाणिग्रहणार्थं सज्जीभूतः अस्ति। किन्तु मत्सदृशेन सामान्यनवयुवकेन सह परिणयार्थं तस्याः इच्छा वर्तते वा न।'

अनयोः वार्तालापं गुप्ततापूर्वकं श्रवणं कुर्वाणा सा शीघ्रं तत्र आगत्य अवदत् 'येन नवयुवकेन मम पितुः प्राणाः रक्षिताः तेन सह विवाहं कुर्तं अहं प्रस्तुता अस्मि।' इदानीमपि किशनः कस्तूरमहाभागस्य व्यापारस्य अर्धभागग्रहणार्थं अस्वीकारम् अकरोत्। यतोहि व्यावहारिकदृष्ट्या एतत् समीचीनं नास्ति। महाशयः स्वपुत्रं अनिलं तत्र आगन्तुम् आमन्त्रितवान्। अनिलः तु पितुः आदेशं श्रुत्वा एव तत्र उपस्थितः। कस्तूरलालः पुरस्कारार्थं किशनाय स्वव्यापारस्य अर्धभागदानस्य विषये पुत्रं ज्ञापयति स्म।

पितुः प्रस्तावं श्रुत्वा अनिलः प्रसन्नः अभवत्। सः अकथयत् 'किशनः इदानीं मम आवुत्तः (Brother in law) भविष्यति। तस्य कठिनपरिश्रमेण वा कठिन प्रयासेन एव भवन्तः रोगमुक्ताः सन्ति। नूनं वयं सर्वे उपकृताः खलु किशनस्य धैर्येण, नैपुण्येन, दाक्षिण्येन, आर्जवेन च। अतः भवतां निश्चयः उत्तमः अस्ति। यदि किशनसदृशः विवेकपूर्णः, परिश्रमी जनः अस्माकं कुटुम्बस्य सभ्यः भविष्यति, तर्हि अस्माकं परिवारे सुखशान्त्योः वृद्धिः भविष्यति। सः अस्माकं सर्वेषां आरोग्यविषयकं मार्गदर्शनं करिष्यति।'

कस्तूरमहाशयः किशनं अकथयत्-'त्वं स्वग्रामं झटिति गत्वा तव जनकं जनिकां, भ्रातरं, भगिनीं च अत्र आगमनार्थं आमन्त्रय। यूयं सर्वे अत्र सुखपूर्वकं निवसन्तु।'

बोधः- एतत् सत्यमस्ति यत्-

**'न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति।'**

**-भूखण्ड सं.-१४३५/सी-१,**
**सै-२,बी, गांधीनगरम्**
**गुजरातप्रदेशः-३८२००७**

# संघर्षमेव मनुष्याणां पथप्रदर्शनं करोति

-नेहा मिश्रा

जीवनम् एका कला अस्ति। केवलं कला एव न अपितु तपस्या अपि अस्ति। अस्माकं शक्तिः समक्षं तु नानाविधाः समस्याः भवन्ति। वयम् तैः हतोत्साहिताः न भवेम यतो हि ताः अस्मभ्यं शक्तिः प्रदानं कुर्वन्ति। ता एव जीवने समस्यानां समाधानाय मार्गं दर्शयन्ति।

एकस्मिन् ग्रामे गीता नामाख्या एका बालिका आसीत्। तस्याः पिता एकः निर्धनः कृषकः आसीत्। यः येन केन प्रकारेण स्व जीविकां चालयति स्म। तस्य पार्श्वे निवासाय गृहं अपि न आसीत्। केवलं एकः कुटीरः आसीत्। यस्मिन् सा सम्पूर्णेन परिवारेण सह निवसति स्म। तस्याः माता अनेकैः रोगैः ग्रसिता सति। चिकित्सायां सत्याम् अपि दिवङ्गता। तदानीम् गीता पञ्चदश वर्षीया आसीत्। दिवङ्गतायां मातरि गीतायाः उपरि दुःखानाम् पर्वत एव आपतितः। द्वे कनिष्ठे भगिन्यौ एकः लघु भ्राता, मानसिक रूपेण विक्षिप्तः पिता आयस्य साधनाभावः सर्वमपि विचार्य गीता नितान्तं दुःखिता अभूत् परन्तु गच्छता कालेन गीतायाः पिता आत्मानं सहजं सरलं मानसिक रूपेण प्रत्यग्रं च विधाय गीतायाः सम्यक् शिक्षा प्रदानाय दृढ़प्रतिज्ञो बभूव। येन केन प्रकारेण भूयांसं श्रमं विधाय सः गीतायाः अध्ययनं व्यवस्थां चकार।

गीता पितुः इदृशीं स्थितिं विहितं श्रमं च विलोक्य मनसि नूनमेव किञ्चित् विशिष्टं कर्तुं संङ्कल्पितवती। पिता च तां सदैव नीतिगत-वचनैः नानाविधैः उदाहरणैः विविधैश्च उपदेशैः गीतां प्रेरयति स्म। कदाचित् सः गीताम् उक्तवान्- पुत्री! पाषाणे अपि विविधप्रकारैः उत्खननैः एव प्रतिमा निर्माणं भवति नानाविधं कष्टं सोड्ढ्वा एव प्रतिभारूपेण परिणतः पूज्यः पाषाणः भवति।

**यात्येकतोऽस्तशिखरं पतिरोषधीना-**
**माविष्कृतोऽरुणपुरः सर एकतोऽर्कः।**
**तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु ॥**

(अभिज्ञानशाकुन्तलम् ४/२)

**स्वभावं न जहात्येव साधुरापद्गतोऽपिसन्**
**कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम्।**

(सुभाषितरत्न भण्डागार)

**रत्नैर्महार्हैस्तुतुषुर्न देवाः**
**न भेजिरे भीमविषेण भीतिम्**

सुधां विना न प्रययुर्विरामः
न निश्चितार्थाद्विरमन्ति धीराः।

(नीतिशतकम् ८५)

क्वचित् भूमौशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिछाकाहारः क्वचिदपि च शाल्योदनरुचिः।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्॥

( नीतिशतकम् ८८)

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः सन्तप्यन्ते न दुःखेषु॥

(नीतिशतकम् ९३)

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम्।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः॥

(नीतिशतकम् १०७)

तप्तः सूर्यः एव निजप्रकाशेन जगतं प्रकाशयति तथैव मनुष्योऽपि नानाविधं कष्टं विविधप्रकारां यातनां सोड्ढ्वा निजज्ञानबलेन चारित्र्येण शिक्षया व्यवहारेण परिवारं समाजं राष्ट्रं च समुन्नतं करोति पितुः इदृशानां उपदेशानां स्नेहा सिक्तां वचनां च महान् प्रभावः आपतितः गीतायाः उपरि। सा अदम्येन उत्साहेन महता परिश्रमेण निजाध्ययने प्रवृत्ता अभूत्। सा चिकित्सा क्षेत्रे कार्यं कर्तुं स्म। परन्तु पितुः आर्थिकीं दशां चिकित्सायाः महर्घं अध्ययनं च विचिन्त्य चिन्तिता अभवत्। कथमपि सा पितुः निज भावनां निवेदितवती। पुत्र्याः एतादृशीं समीहाम् उत्साहं च विलोक्य पिता अवदत् पुत्री चिन्तां मा कुरु अहं तव पठनाय व्यवस्थां सम्पादयामि। कोशागारात् किञ्चित् ऋणं कृत्वा किञ्चित् भूमिभागं च विक्रिय सः गीतायाः अध्ययनाय सम्पादितवान्। गच्छताकालेन गीता एम.बी.बी.एस, एम.डी इत्याख्य परीक्षायां सर्वोच्चं स्थानं प्राप्तवती। सर्वोच्चस्थानं प्राप्तिकारणेन तस्याः सम्माननाय विश्वविद्यालयेन एकः समारोहः आयोजितः तस्मिन् समारोहे गीता स्व साफल्यस्य सर्वमपि श्रेयः पितुः दत्तवती उत्तवती च यत् कठिनायां परिस्थतौ अपि आत्मबलेन मनोयोगेन साहसेन धैर्येण परिश्रमेण मनुष्याः कठिनं कार्यं सम्पादयितुं समर्थः भवति। अहं निर्धनानां दीनदुःखीनां चिकित्सा द्वारा सहायं विधाय निजस्य समाजस्य राष्ट्रस्य सेवां विधास्यामि। समारोहे सा स्वीयं सर्वमपि इतिवृत्तं श्रावितवती यत् श्रुत्वा समुपस्थितानां नेत्राणि सजलानि आसन् अद्य गीता एका सफला चिकित्सका राष्ट्रस्य प्रतिष्ठिताभूता अस्ति। तस्याः भगिन्यौ भ्राताऽपि तस्याः सानिध्यं प्राप्य चिकित्साक्षेत्रे एव कार्यं कर्तुं सङ्कल्पितवन्तः।

–शोधच्छात्रा, संस्कृत विभागः,
कलासंकाय, काशी हिन्दूविश्वविद्यालयः,
वाराणसी–२२१००५

# जीवनस्य साफल्यम्

- डॉ. मीनू बाला मल्होत्रा

एकः ग्रामः आसीत्। तस्य ग्रामस्य नाम रामपुरः आसीत्। एषः ग्रामः सुंदरः आसीत्। ग्रामे सर्वे जनाः सुखिनः आसन्। ते सर्वे उदाराः, उद्यमाः चतुराः चापि आसन्। समीपे एव एकम् वनम् आसीत्। तत् वनं हरितः आसीत्। तस्य वनस्य नाम रामवनमासीत्। यदा रामपुरस्य जनाः नगरम् गच्छन्ति स्म, तदा ते रामवनस्य मध्यस्थित मार्गेण एव गच्छन्ति स्म। वने लघवः, गुरवः च सर्वे जन्तवः मिलित्वा वसन्ति स्म। सर्वे पक्षिणः, पशवः च विना भयं वने विचरणं कुर्वन्ति स्म। उन्नताः वृक्षाः नभं स्पृशन्ति स्म। अरण्ये खगाः कूजनम् कुर्वन्ति स्म। वनस्य नृपः सिंहः, परिश्रमेण भोजनम् प्राप्नोति स्म।

तस्मिन्नेव ग्रामे द्वे मित्रे अपि निवसताम्। तौ घनिष्ठौ मित्रे आस्ताम्। सदैव परस्परम् मिलित्वा अपठताम्, अलिखताम्, अक्रीडताम्, अखादताम् च। वरुणः सप्त वर्षीयः असीत्, तरुणः च दश वर्षीयः आसीत्। वरुणस्य मातुलः नगरे अवसत्। वरुणः अपि यदा-कदा नगरम् गच्छति स्म। गतसप्ताहे तस्य मातुलः नगरात् प्रत्यागच्छत्। अतः प्रतिसायम् ग्रामीणाः नगरस्य गौरवगाथाः श्रोतुम् वटवृक्षस्य अधः आगच्छन्ति स्म। वरुणस्य मातुलः अपि नगरस्य विकासाय वार्तायाः सुरुचिपूर्वकम् वर्णनम् करोति स्म। सैव उक्तवान्- अद्यत्वे नगरे भारतसर्वकारः हरित-अभियानम् चालयति। अस्मिन् अभियाने प्रत्येकम् जनः एकम्-एकम् वृक्षारोपणम् करिष्यति। कोऽपि मानवः नगरम् गत्वा स्वदेशम् हिताय वृक्षारोपणम् कुर्तम् शक्नोति।

वरुणस्य मातुलः अकथयत्- मानवः प्रदूषणम् उत्पादयति येन अस्माकं धरा उष्णा अभवत्। अपि च भीषण-उष्मया अस्माकं धरायाम् जलस्य अभावः, ऋतुनाम आवागमने असंतुलनम्, अत्यधिकवृष्टिः इत्यादयः आपदाः उत्पन्नाः अभवन्। एषः एव वैश्विकतापः अथवा भूमंडलीयकरणम् अथवा आंग्लभाषायाम् ग्लोबल वार्मिंग इति कथ्यते। यदा धरायाः वायुमंडले विशेषरूपेण वृद्धिः भवति तदा जलवायुः अति उष्णः भवति। ऋतवः समयेन आगच्छन्ति। अनेन प्रकृतिचक्रम् बाधयति, प्राकृतिकपदाम् च आमंत्रयति। वृक्षारोपणमेव अस्य आपदस्य उत्तमम् निवारणम् अस्ति। मातुलः ग्रामवासीनां संबोधयति यत् इमम् भूमंडलीयकरणदानवं हन्तुम् धरायाः रक्षणार्थं वृक्षारोपणम् अस्माकं परमं कर्तव्यमस्ति। एतत् श्रुत्वा सर्वे जनाः चिंतयन्ति। सायंकालः अभवत्। सर्वे जनाः स्व-स्वगृहं अगच्छन्।

वरुणः तरुणः च देशभक्तौ आस्ताम्। तौ स्व-स्व पितरो समीपम् अगच्छताम्। नगरम् च गत्वा वृक्षारोपणस्य इच्छाम् उक्तवन्तौ। पित्रयोः आज्ञां प्राप्य तौ मित्रे प्रसन्ने अभवताम्। आगामि प्रभाते स्नानादिकम् कृत्वा पित्रयोः आशीर्वादम् नीत्वा नगरम् प्रति अचलताम्। मार्गे खादितुम् वरुणस्य अम्बा

रोटिकाः, शाकम्, दधि, संयावम् च अयच्छन्। तरुणस्य अम्बा सूपम्, ओदनम्, द्वे कदलिफले, एकम् सेवम्, खादिततुम् पातुम् च शीतलजलेन पूर्णा कूपिका अयच्छत्। वरुणः एक बोधिवृक्षम् नीतवान्, तरुणः च एकम् आम्रस्य वृक्षम् नीतवान्। प्रातः काले पंचवादने तौ गृहात् चलितवन्तौ। ग्रामस्य बहिः रामवनम् आसीत्। वन्यपुष्पाणाम् सौन्दर्यं दर्शनीयमासीत्। वने मंदः-मंदः शीतलः समीरः वहति स्म। शीघ्रमेव तौ मित्रे नगरम् प्राप्तवन्तौ। नगरे भारतसर्वकारस्य निर्देशानुसारेण तौ राजमार्गम् उभौ वृक्षौ आरोपितवन्तौ। तौ अतीव प्रसन्नो आस्ताम्। आनन्देन च गृहम् चलितवन्तौ। तौ नक्तम् पूर्वमेव गृहम् प्रत्यागन्तुम् इच्छतः स्म। भानुमहोदयः आकाशे आसीत्। वरुणः तरुणः च भोजनम् खादितुम् एकस्य वृक्षस्य नीचैः अतिष्ठताम्। विश्रामं कृत्वां पुनः ग्रामं प्रति अचलताम्।

तरुणः अग्रे-अग्रे चलति स्म, वरुणः च पृष्ठे- पृष्ठे चलति स्म। सहसा तरुणः एकम् रुदन-स्वरम् श्रुत्वा अतिष्ठत्, पृष्ठे च अपश्यत्। वरुणः कुत्रापि नासीत्। सः उच्चस्वरेण वरुणम् आहूयति स्म। हे वरुण! मित्र वरुण! त्वम् कुत्र गतः? अहो! किं करोमि? तदैव सः पुनः ध्यानेन अपश्यत्। तस्य पृष्ठे यः गर्तः आसीत् तस्मिन्नेव गर्ते वरुणः अपतत्। स्वमित्रम् गर्ते पतन् दृष्ट्वा तरुणस्य हृदयम् विकलम् अभवत्। निश्चयेनैव कोऽपि दुष्टः आखेटकः गजराजम् स्वीकर्तुम् अस्य गर्तस्य निर्माणम् कृत्वा तस्योपरि हरितम् घासम् प्रसारयति स्म। अहो भाग्य, गजराजस्य पूर्वमेव तस्य मित्रम् अत्र आगतवान्, गर्ते च पतितवान्। वरुणस्य रक्षणार्थाय तरुणः इतस्ततः अधावत् सहायतया च जनानाम् आहूयति स्म। किंतु निर्जने वने कोऽपि तस्य सहायता कर्तुम् न आगतवान्।

तरुणः कनिष्ठः आसीत् किंतु चतुरः आसीत्। सः शीघ्रम्-शीघ्रम् शुष्कं तृणं नीत्वा रज्जोः निर्माणम् अकरोत्। ताम् रज्जुम् गर्ते क्षिप्त्वा वरुणम् उक्त्वान्- हे मित्र। अलम् चिंतया। अहम् अस्मि। इमाम् रज्जूम् बलपूर्वकम् स्वीकरोतु। अहम् त्वाम् उपरि आकर्षयामि। एतत् श्रुत्वा वरुणः अपि किंचित् शांतम् अभवत्। ईश्वरस्य स्मरणम् कृत्वा तरुणः रज्जुम् गर्ते अक्षिपत्। ताम् रज्जुम् स्वीकृत्वा वरुणः अवलम्बनम् अकरोत्। तरुणः शनैः-शनैः रज्जुम् उपरि आकर्षयति स्म। गर्तात् बहिः आगत्य वरुणः अवदत्-मित्र तरुण! धन्यवादः करोमि। उभे मित्रे परस्परम्मिलित्वा प्रसन्ने अभवताम्। चतुरः तरुणः स्वमित्रस्य प्राणरक्षाम् अकरोत्। यदा वरुणः तरुणम् धन्यवादः अकथयत् तदा तरुणः उक्तवान्-अहो मित्र! मित्रतायाम् धन्यवादस्य स्थानम् नास्ति, केवलं मित्रतास्ति। हसन्तौ तौ उत्साहेन गृहं प्रति अधावताम्।

सायंकालवेला भूतवती। सर्वे वरिष्ठजनाः, वृद्धाः च वटवृक्षस्य अधः उपविष्टवन्तः। बालाः अपि च समीपे एव खेलन्ति स्म। तरुणम् वरुणम् च दृष्ट्वा तत्रैव आगतवन्तः। ते सर्वे तयोः नगरयात्रयाः वर्णनम् श्रोतुम् उत्सुकाः आसन्, किन्तु तौ मित्रे तु रामवने घटिता तत् घटनां वक्तुम् व्याकुले आस्ताम्। तरुणः वरुणः च मिलित्वा सर्वप्रथमं भारतसर्वकारस्य वृक्षारोपण अभियानस्य विषये कथितवन्तौ, ततः वनस्य घटनाम् कथितवन्तौ। तरुणः अकथयत्- यदा आवाम् वृक्षारोपणम् कृत्वा नगरात् ग्रामम् प्रति आगतवन्तौ तदा एषः वरुणः रामवने एके गर्ते पतितवान्। सः गर्तः कोऽपि आखेटकः कस्य गजस्य आखेटाय खनितवान्। निश्चयेनैव तस्य गर्तस्योपरि हरितः घासः प्रसार्य सः गर्तः गजस्य प्रतीक्षाम् करोति स्म।

वृक्षारोपणम् कृत्वा यदा आवाम् शीघ्रम्- शीघ्रम् नगरात् गृहम् आगच्छवन्तौ तदा वरुण: हरितस्य घासस्य अध: रचितम् गर्तम् न अपश्यत् गर्ते च अपतत्। तस्य करुणं रुदनम श्रुत्वा अहम् व्याकुल: अभवतम्। सहायतया च उच्चै: उच्चै: सहायार्थम् आह्वानं च कृतम् किंतु वने कोऽपि सहायता कृते नागतवान्। तदा अहम् बुद्धिबलस्य प्रयोगेन शुष्कं घासम् एकत्रितं कृत्वा रज्जो: निर्माणम् कृतं। ताम् रज्जुम् गर्ते अक्षिपम्। वरुण: च ताम् रज्जुम् स्वीकारम् कृत्वा बहिरागतवान्। इत्थम् मार्गस्य सम्पूर्णम् वृत्तान्तम् श्रुत्वा ग्रामस्य जना: विस्मिता: जाता:। अपि च सर्वे हसन्ति स्म। किम् एष: बाल: स्वमित्रम् गर्तेन बहि: कर्तुम् समर्थोऽस्ति? एतत् चिन्तनम् कुर्वन्ति स्म।

तदैव पूर्णरूपेण विचार्य पंचमहोदय: अवदत्-अलम् कोलाहलेन। शृण्वन्तु, सर्वे जना: ध्यानेन शृण्वन्तु, यदि एषा घटना अस्मिन् ग्रामे भवति, तर्हि निश्चितम् यत् तरुण: स्वमित्रम् केनापि गर्तात् बहि: कर्तुम् समर्थ: नासीत्, यत: अस्माकम् मानवानाम् एष: व्यवहार: अस्ति यत् यदि कोऽपि जन: किंचित् कार्यम् कर्तुम् तत्पर: भवति, अपरा: जना: नकारात्मकम् विचारम् उक्त्वा तस्य उत्साहम् क्षीणम् कुर्वन्ति। मानव: च तत् कार्यम् न करोति अथवा अपूर्णमेव त्यजति। वने तरुणस्य उत्साहम् क्षीणम् कर्तुम् अथवा ताम् हतोत्साहितम् कर्तुम् कोऽपि जन: नासीत्। अत: स्वबलस्योपरि विश्वासं कृत्वा बुद्धिबलेन स: वरुणम् गर्तात् बहि: कर्तुम् सफल: अभवत्। समयानुसारेण स: तत् एव अकरोत् यत् करणीयम्। एतत् श्रुत्वा सर्वे जना: नतमस्तका: भूत्वा पंचमहोदयस्य समक्षे स्थितवन्त:। पंचमहोदय: अवदत्- पराजय: विजय: च भवताम् चिंतनमस्ति।

(सत्यमस्ति, सत्यमस्ति एषा उद्घोषणा सर्वे ग्रामे गुंजति स्म।)

सत्यमेव कथ्यते-

**मन्यते यदि मानव:, निश्चित: खलु पराजय:।**
**साफल्यम् तस्य जीवनस्य, निश्चयं करोति य:॥**

तदन्तरम् ग्रामीणजना: मिलित्वा तरुणस्य करतलध्वनिम् कृत्वा स्वागतम् अकुर्वन् प्रशंसा च अकुर्वन्। पंचमहोदय: वीरबालकाय तरुणाय पुरस्कारस्य घोषणा अपि कृतवान्।

निशाचरस्य निर्मल: प्रकाश: नीलगगने प्रसारित स्म। तरुण: वरुण: च स्व स्वगृहम् प्रति अधावताम् यत्र तयो: अंबे स्वादिष्टम् भोजनार्थाय प्रतीक्षां करोति स्म। इति।

- ८ डी, शिवम एन्क्लेव:
एम.आई.जी.डी.डी.ए फ्लैट्स,
जिंजर होटलस्य समक्षे, झिलमिल:,
शाहदरा, देहली-३२

# संघर्षः

-डॉ. राकेशः शास्त्री

एकस्मिन् नगरे एकः सम्भ्रान्तः परिवारः वसति स्म। नगरवासिनः तं परिवारम् अतीव स्नेहं कुर्वन्ति स्म। तस्मिन् परिवारे त्रयः सदस्याः आसन्। एकः रामलालः, यः बैंकमध्ये वरिष्ठलिपिकोऽऽसीत् सः सर्वेषां नगरवासिनाम् सहयोगः प्रायः करोति स्म। अन्या च तस्य रामलालस्य 'सुशीला' नाम्नि शिक्षिता पत्नी यथानाम तथा गुणवती, अतीव शीलवती संस्कारवती परिश्रमी चाऽऽसीत्। एकश्च पंचपर्षीयः संस्कारवान् पुत्रः तस्य नाम आसीत्, देवीलालः।

रामलालेन सुशीलया सह अन्तर्जातीयो विवाहः कृत आसीत्। अनेनैव एतयोः स्व-स्व परिवारेण सह नैव तारतम्योऽऽसीत्, किन्तु परस्परमेतौ द्वावेवातीव प्रेमपूर्वकं अनिवसताम्। सहैव च जीवनमरणस्य शपथवन्तौ अनेकशः।

रामलालस्य पत्नी प्रातःकाले ब्रह्ममुहूर्ते उत्थाय प्रतिदिनं स्नानादिकं च कृत्वा प्रथमं पूजनादिकं भगवत्स्मरणं च करोति स्म। तदनन्तरं च भोजनादिकं सज्जीकरोति स्म। एकदा प्रातःकाले एतौ चायपानं कृतवन्तौ स्म।

तदैव **रामलालः उवाच**- भगवति! अस्माकं एकः खलु पुत्रोऽस्ति एनं किं निर्मातुं वाञ्छामः वयम्?

**सुशीला अवदत्**- अहं तु वांछामि यदेषः समाजसेवी चिकित्सको भवेत्।

**रामलालः**- नैव सुशीला, मम महतीच्छाऽऽसीत्, यदहं आई.ए.एस भूयाम्, किन्तु परिस्थितयः नैव एतादृशी आसन्। भाग्योऽपि बहुप्रतिकूलताम् अगच्छत्, अनेनैव बैंकमध्ये लिपिको भूत्वा स्थितोऽस्मि सम्प्रति, अनेन मम तु बलवती इच्छा वर्तते यत्, -

**सुशीला**-यदि एवमस्ति, तर्हि भवान् समीचीनमेव वदति, अस्माकं पूर्णप्रयासः भविष्यति स्वजीवने, यत् पुत्रोऽस्माकम् अयम् आई.ए.एस. वै भूयात्, अस्माकं च नामोच्चं कुर्यात्। इति।

xxxxxx

अद्य रामलालोऽतीव प्रसन्नोऽस्ति, यतोहि अस्मिन् दिने तस्य पदोन्नत्याः घोषणा भविष्यति बैंकमध्ये। अतएव सः विशेषेण सज्जो भूत्वा स्वबैंकप्रति गच्छति स्म। मार्गे च तस्य समक्षं पूर्वाण्यनेकानि

चित्राणि आगतानि-गतानि च। पञ्चवर्ष पूर्वं खल्वनेन एषा 'नौकरी' कृताऽऽसीत्। तस्य चिन्तनम् एतत् परिचलति एव......।

तदैव तस्य पुरतः एकेन तीव्रगत्याऽऽगतेन भारवाहनेन ट्रकेन तस्य रामलालस्य द्विचक्रिका संघट्टिता। अनेन तस्य द्विचक्रिका तु विखण्डिता अनेकभागेषु, रामलालस्य च उच्चस्वरेण हृदयविदारकः ''चीत्कारः'' निस्सरितः तथा सः भूमौ पतित्वा किंचित्कालपर्यन्तं स्फुरितवान्, अनन्तरं च दर्शयन्-दर्शयन् निश्चलो संजातः। तदैव खल्वनेके जनाः एकत्रिताः संभूताः तत्र। ते परस्परमेवं वार्तालाप कुर्वन्ति स्म।

**एकः जनः** -अहो, कीदृशी हृदयद्राविकी दुर्घटना संजाता प्रातः काले खलु? वराकः, मार्गे सम्यक् एव परिचलति स्म, किन्तु अनेन ट्रकचालकेन प्रतीयते मदिरा गृहीताऽऽसीत्, अनेनैव अनुचितं मार्गे आगत्य एनं दुर्भागं संघट्टितम्, अधुना त्वस्य मृत्युः संजाता, नैवावसरो दत्तोऽनेन यत् चिकित्सालयमपि नयेम। ट्रकचालकस्तु पलायितः एव।

**अन्यः जनाः** - भ्रातः! एषा तु महती दुखान्तिका संजाता। अधुना तु पुलिसं प्रति सूचना देया, येन पोस्टमार्टमादिकं भवेत्, अनन्तरं ज्ञास्यतिः कोऽमस्ति? अस्य सम्बन्धिनः के सन्ति अस्मिन् नगरे? तान् प्रत्यापि सूचना देया अस्माभिरेव।

तदैव तस्य रामलालस्य पत्नी या सब्जी-क्रेतुम् निसरिता गृहात्, तत्र सम्मर्दं दृष्ट्वा मनसि चिन्तितवती, नैव जाने किं संजातं प्रातः काले खल्वत्र?

किन्तु यदा सा सम्मर्दे जनान् इतस्ततः किंचित्प्रयत्न पूर्वकं प्रविष्टा, तदा निस्सरिता पादाभ्याम्। क्षणं यावतु सा जड़वती संजाता, अनन्तरं एतत् कथं संजातम्? इत्युक्त्वा सा तं शरीरम् आलिंग्य अनेकशः, स्वांके च तस्य रक्तरंजित शीर्षं निधाय कारुणिकं रोदनं तारस्वेरण कृतवती। तत्रस्थाः सर्वे जनाः अतीवकारुणिकाः संजाताः, तस्याः रोदनेन तेषां सर्वेषां नेत्रेषु अश्रूणि आगतानि। तेषु काश्चित् स्त्रियः अग्रे भूत्वा तां सुशीलां सांत्वना वचांसि उक्तवत्यः।

तदैव पुलिसकर्मिणोऽपि अनेकाः आगतवन्तः तत्र। '' इनक्वारी'' च बहुशः अकुर्वन्। 'पंचनामा' च कृत्वा तस्य च रामलालस्य मृतशरीरं गृहीत्वा चिकित्सालयं नीतवन्तः 'एम्बुलेंस' नाम वाहनेन तस्य 'पोस्टमार्टम'-कृते। सुशीला अपि तेन सह ''एम्बुलेंस'' मध्ये आरोहिता।

xxxxxx

रामलालस्य माता-पितरौ अपि गृहात् तत्र आगतवन्तौः। रामलालस्य अन्तिमो संस्कारः सञ्जातः, तस्मिन्नेव दिने सायंकाले यावत्। अनन्तरं सर्वे सम्बन्धिनः सुशीलाम् अवदन्-

पुत्रि! अधुना त्वं अस्माभिः सह चलतु। तत्रैव एषः देवीलालोऽपि अध्ययनकार्यं करिष्यति। नैव इदानीं तव अत्र निवसनम् उचितम् अस्ति, यतोहि त्वम् अत्र एकाकिनी असि। नार्यः एकाकिनी सुरक्षिता न भवन्ति। अत्र तव कोऽपि नास्ति?

तेषां च सर्वेषां तद् वचनं श्रुत्वा सुशीला, तैः पूर्वकृतानि कृत्यानि स्मरन्, कठोरतमं दुर्व्यवहारं च विचिन्त्य (धैर्यपूर्वकम् स्व-अश्रूणि अवरुध्य) दृढ़स्वेरण अवोचत्-

अम्ब! नैवाहं अस्मात् स्थानात् कुत्रापि गमिष्यामि। मम एकः एव पुत्रोऽस्ति, एषः रामलालस्य 'स्मृतिः' वर्तते। अहं परिश्रमं कृत्वा स्वयमेव स्वपुत्रं पाठयिष्यामि। अस्य भविष्य-निर्माणं खलु मम जीवनस्य लक्ष्यम् इदानीम्। अतएव मया भवद्भ्यः सर्वेभ्यः प्रार्थना एषा क्रियते अत्यन्त विनम्रभावेन यत्-

''भवन्तः स्व-स्व गृहेषु गच्छन्तु इदानीम्, (किञ्चिद् विरम्य) अस्यां दुःखस्य वेलायां भवन्तः आगतवन्तः, एतदर्थम् अहम् अतीव कृतज्ञोऽस्मि भवन्तः सर्वान् प्रति। केवलं वांछेऽहं यत् भवन्तः अस्य मम पुत्रस्य ऊपरि स्व-स्व आशीर्वचांसि वितरन्तु। तस्याः तं रूक्षं व्यवहारं दृष्ट्वा सर्वे सम्बन्धिनः स्व-स्व गृहं गतवन्तः। यतोहि पूर्वकाले तेऽपि अतीव-कठोर-व्यवहारं कृतवन्तः ताभ्याम् सह। वस्तुतः अन्तर्जातीयविवाहकृतवन्तौ एतौ परस्परम्। अनेन कारणेन सर्वे सम्बन्धिनः अतीवाक्रोशिताः आसन्। तैस्तु विवाहकाले खलु कथितम्- 'यत् अन्तर्जातीय-विवाहनन्तरम् तु अस्माकं कृते युवाम् द्वौ मृतवन्तौ खलु।''

रामलालस्य पुत्रस्य जन्मकालेऽपि नैव कोऽपि सम्बन्धी आगतवान्। अनेन अतीव कटुता आसीत् परस्पम् तेषां मध्ये।

xxxxxx

तस्मादेव दिवसात् सुशीलायाः जीवनस्य एकमेव लक्ष्यं सञ्जातम्। यत् अस्माकं पुत्रः देवीलालः आई.ए.एस वै भवेत्। एतदर्थं तया अनेकप्रकारेण दिवा-रात्रौ परिश्रमं कृत्वा तं उच्चशिक्षा प्रदत्ता। बैंकमध्ये तां 'नौकरी' अपि न मिलिता, यतोहि तत्र रामलालस्य खलु एकवर्षः एव अभवत्, नैव तत्र सः स्थायी आसीत्। एतदर्थं सा जनानां गृहेषु कार्यंकृत्वा रात्रौ च वस्त्रसीवनं कृत्वा किंचित्धनं अर्जितवती, तेन खलु धनेन, सा स्व परिवारस्य पालन-पोषणं करोति स्म तथा च स्व पुत्रस्य शिक्षार्थमपि धनं एकत्रितं करोति स्म।

xxxxxx

अद्य सुशीला अतीवप्रसन्ना अस्ति। यतोहि तस्याः, पत्युः स्वप्नं साकारं सञ्जातम्। अद्य खलु तस्याः 'संघर्षः' अपि सफलोऽभवत्, यतोहि सम्प्रति तस्याः पुत्रः देवीलालः आई.एस.एस. सञ्जातः। अस्मिन्नेव वै नगरे जिला कलेक्टररूपेण तस्य नियुक्तिः संभूता। अनेनैव नगरनिवासिभिः अद्य अभिनन्दन-समारोहः आयोजितः तस्य पुत्रस्य नगरस्य विशाले सभागारे।

समारोहे साऽपि आमन्त्रिता नगरवासिभिः। प्रातः उत्थाय सुशीला सर्वप्रथमं मन्दिरं भगवन्तं गतवती, धन्यवादान् च बहुशः अर्पितवती भगवन्तं प्रति, यत् तेनैव भगवता तस्याः जीवनस्य 'संघर्षः' सफलः कारितः। मन्दिराद् आगत्य यदा सा समारोहस्थलं कार-याने स्थित्वा स्वपुत्रेण सह गच्छति स्म। तदा पूर्वकालिमानी दीर्घकालिमानि कष्टपूर्ण-घटनाक्रमाणि तथा च स्व पत्युः स्मृतिरपि तस्याः पटले आगताऽऽसीत्।

तदैव समीपस्थेन देवीलालेन तस्याः अश्रूणि प्रोञ्छितानि स्व कर-वस्त्रेण खलु उक्तवान् च विनम्रभावेन सः-

"अम्ब! अधुना तव सर्वाणि कष्टानि दूरीभूतानि, अहं तव सर्वाः इच्छाः पूरयिष्यामि। माम् "आई. ए.एस." निर्माणार्थं बहूनि कष्टानि भवत्या अनुभूतानि। अधुना तेषां सर्वेषां अन्तः संजातः। अद्य समारोहे एव मम अभिनन्दनं भविष्यति तवैव खलु भविष्यति, यतोहि भवादृशी माता यदि सर्वेषां भवेत्, तर्हि अवश्यमेव अस्माकं देशे सर्वे युवानः सम्मानजनकं पदं लभेरन्।"

तस्य तद्वचनं श्रुत्वा सुशीला भावुका सञ्जाता तथा च सा पुत्रम् तं स्व अङ्के कृतवती कार-याने खलु। इति।

**-१ जे-३८, हाउसिंग बोर्ड कालोनी,**
**बांसवाड़ा, राजस्थानम् :-३२७००१**

# मेधाविनी विशाखा

-रामकुमारः शर्मा

जयपुरनगरे मेधाविनी विशाखा नामवती महिला आसीत्। यदा सा चतुर्विंशति वर्षीया तदा तस्या विवाह अभवत्। सा सर्वगुणोत्तमा संस्कारवती वधू च आसीत्। विवाहो भूत्वा सा श्वशुरालयं समागतवती। श्वशुरालये तस्याः पतिः, श्वश्रूः, काचित् वृद्धा मातामही-श्वश्रूः च वसन्ति स्म। विशाखा तत्र गृहे सर्वाणि कार्याणि समारीत्या परिशीलवती। तस्याः श्वश्रूः वृद्धां मातामही-श्वश्रूं सर्वदा हिंनस्यति स्म। तां ताडयति स्म, निन्दति स्म, भोजनमपि न सम्यक् ददाति स्म च। एतत् सर्वं विशाखायै न रोचते स्म। सा माता-मह्यां दैन्यं प्रदर्शयति स्म। श्वश्रूः कथंचिदपि बोधनीया इति अचिन्तयत् असौ।

एकदा तया श्वश्रूः समक्षे स्वमनसि समागता भावना प्रकटिता, परन्तु श्वश्रूस्तु अतिदुष्टा आसीत्। सा कथितवती 'नूतना आगता बालिका मां पाठयति। त्वं न जानासि यत् अस्मिन् गृहे मया कति वर्षाणि व्यतीतानि? तूष्णीं तिष्ठ। अहमेव गृहस्वामिनी अस्मि।' विशाखा अपमानं पुरस्कृत्य स्मिता भूत्या स्वकार्ये दत्त चित्त अभवत्। विशाखा मनसि अहर्निशं एषा चिन्ता आसीत् यत् कथं गृहस्य वातावरणं शान्तिमयं भवेत्? अन्ते तस्याः मनसि कश्चन उपायः स्फुरितः। सा श्वश्रूं किमपि न उक्तवती। प्रतिदिनं गृहकार्यस्य समाप्तेः अनन्तरं मातामहयाः समीपे उपविश्य तस्याः सेवा करोति स्म। तस्याः अपेक्षितान् सकलान् उपचारान् करोति स्म। विशाखायाः दीर्घकालं यावत् वृद्धायाः समीपे समय-यापनं तस्याः श्वश्रूः न असहत्।

एकस्मिन् दिने श्वश्रूः विशाखामाहूयः उक्तवती- ''त्वं मातामह्या समीपे किमर्थं कालं यापयति? तत्र तव किम् कार्यम्''? इत्युक्त्वा उच्चैः सा गर्जितवती। विशाखा विनम्र स्वेरण प्रावोचत्- 'मातः! मम पिता मां श्वश्रूगृहं प्रेषणकाले उवाच-पुत्रि! ''श्वशुरालये आरम्भतः एव गृहस्य पद्धति विज्ञाय तदनुरूपं कार्य कुर्याः त्वम्। बालानां समीपे अधिक समयं न यापनीयम्। गृहस्य वृद्धानां सेवा करणीया त्वया।''

अस्माकं गृहे अत्र मातामही एव ज्येष्ठा वर्तते। अहं तां पृष्ट्वा सर्वान् विषयान् जानीयाम् इति मत्वा तस्याः समीपं गच्छामि।''

अत्रत्याः पद्धतीः ज्ञातुं एव मातामही समीपं उपसर्पामि''। अहं मातामहीं पृच्छामि यत् ' मम श्वश्रूः कथं भवतीं सेवतवती? यतो हि मया अपि तथा भवत्याः सेवा करणीया खलु। मातामही माम् उक्तवती-'तव श्वश्रूः मां ताडयति, भोजनमपि समग्तया न ददाति, दुर्वचांसि ब्रवीति खलु' इत्येवमकथयत् सा। श्वश्रूः- 'त्वमपि तथैव मम सेवां करिष्यसि किम्? इति पृष्ठवती। विशाखा- 'मम पिता श्वश्रूगृहस्य

पद्धतिः पालय इति उक्तवान् खलु!'' इति धिया समादधात्।

अहं स्वस्याः वृद्ध श्वश्रूः यथा क्लेशयन्ती अवमन्यमाना चास्मि, तथैव एषा अपि मम अवमाननं करिष्यति इति विचार्यती श्वश्रूः भीता अभवत्। एकदा नष्टं पाषाणपात्रं एकस्मिन् कोणे जागरूकता स्थापयन्तीं विशाखां श्वश्रूः अपश्यत्। विशाखा उवाच- ''भवती मातामह्यै अस्मिन् पाषणपात्रे एव अन्नं स्थापयति किल। अहमपि भवत्यै अन्नस्थापनाय पाषाणपात्रं जागरूकतया स्थापयामि।''

''मह्यं पाषाणं पात्रे ओदनं परिवेषयिष्यसि किम्? पाषाणपात्रे अन्न स्थापनस्य पद्धतिः नास्ति।''

''तर्हि मातामह्यै भवती किमर्थं पाषाणपात्रे एव ओदनं स्थापयसि?''

'' तस्यै स्थालिकायां स्थापयामि येन् तां स्थालिकाम् कः प्रक्षालयिष्यति''

''अहं प्रक्षालयिष्यामि''

''तर्हि स्थालिकायामेव ओदनं परिवेषय। तत् पाषाणपात्रं बहिः क्षिप।''

श्वश्रूः सर्वेषां भोजनानन्तरं अवशिष्टान् पर्युषितान् च पदार्थान् वृद्धायै ददाति स्म। एतत् विशाखायै न अरोचत्। सा धिया किञ्चन कार्यं अकरोत्।

तया कस्मिंश्चित् दिने मातामह्यै परिविष्यमाणं ओदनं परीक्षितम्। तद् दृष्ट्वा श्वश्रूः- विशाखे! किं पश्यसि त्वम्?

विशाखा -''वृद्धेभ्यः कीदृशं ओदनं परिवेषणीयम्' इति ज्ञातुमुत्सुका अस्मि।

श्वश्रूः - 'ज्येष्ठेभ्यः उत्तमः आहारः एव दातव्यः'।

''तर्हि भवती तस्यै किमर्थं अवशिष्टं यच्छसि? ''

''तस्यै उष्णं ओदनां नीत्वा का स्थापयति?''

''भवती अनुमन्यते चेत् प्रतिदिनं पाकानन्तरं तस्यै अहमेव ओदनां परिवेषयामि।''

''अस्तु तथैव कुरु।''

''तथैव करोमि मातः''

तदा आरभ्य विशाखा मातामह्यै उष्णं ओदनं ददाति स्म। मातामही विशाखां मनसा एव आशिषः उक्तवती।

एकस्मिन् दिने श्वश्रूः आपणं प्रत्यागच्छत्। आपणात् बहूनि नूतनानि सम्भाराणि नीत्वा समागतवती। नूतनाः शाटिकाः अपि आनीतवती। श्वश्रूः नूतनां शटिकां धारयित्वा अतीव मोदमाना सञ्जाता परन्तु मातामह्यै केवलां पुरातनीं शाटिकां सापि जीर्णशीर्णा आसीत् प्रायच्छत् च। विशाखा एतत् दृष्ट्वा अति दुःखिता अभूत्। विशाखां श्वश्रूं प्रावोचत्-'भवती मातामह्यै यादृशीं शाटिकां प्रयच्छति तन्न समीचीनम्। 'वृद्धेभ्यः कीदृशानि वस्त्राणि दातव्यानि' इत्यहं भवत्या गृहे एव शिक्षयामि।'' श्वश्रूः भीता अभवत्। सा उक्तवती- ' त्वमेव तस्यै नूतन शाटिकाः क्रीणीहि''।

वृद्धा सर्वदा कस्मिंश्चित् नष्टमञ्चे पतिता इव भवति स्म। मञ्चस्य रज्जुः जीर्णा, विदीर्णा चासीत्। मञ्चः च त्रुटितः आसीत्। विशाखा तं मञ्चं तदेव दृष्ट्या वीक्षमाणा आसीत्। श्वश्रूः -'किं पश्यसि? '' इति पृष्टवती।

'ज्येष्ठेभ्यः मञ्चः कथं सज्जीकरणीयः' इत्यहं अवलोकयामि'। ''वृद्धेभ्यः एतादृशं मञ्चं न यच्छन्ति कोऽपि। मञ्चः त्रुटितः इति कारणेन एवं ज्ञातः।''

''किमर्थं मञ्चं न समीकारितवन्तः''?

''त्वं समीकार्य नूतनां रज्जुं रचय।''

''भवती वदसि चेत् तथैव करिष्यामि।''

मातामहयै नवीनमञ्चः सिद्धः अभवन्। मातामही अतीव प्रसन्ना अभवत्। सा विशाखां प्राशंसत् आशीर्वादमपि प्रायच्छच्च।

एकदा कस्मिंश्चित् गृहे विवाहः आसीत्। श्वश्रूः एकाकिनी एव सज्जी भूत्वा विवाहे गन्तु मुद्यता आसीत्। बहूनि आभूषणानि धारयित्वा मुखे सौन्दर्यरागं लेपयित्वा तरुणीव सज्जी भूत्वा यदैव गृहात् निर्गन्तुमुद्यता अभवन् तदैव विशाखां तां दृष्ट्वा प्रावोचत्। 'कुत्र गम्यते त्वया?'' श्वश्रूः अवदत्-'अहं विवाहोत्सवे गच्छामि। त्वं कथं पृच्छसि? विशाखया उक्तम् 'यदा भवती सज्जी भूय मातामहीं परित्यज्य विवाहोत्सवे गच्छति, तदैव अहमपि एतादृशमेव गमिष्यामि।'' श्वश्रूः भीता अभवत्। सा विशाखां मातामहीं च नीत्वा समागतवती।

अधुना मातामह्यै उत्तमं भोजनं उत्तमानि वस्त्राणि, मञ्चः, इत्यादिकं सर्वं सिद्धमभवत्। विशाखा स्वमेधया प्रभावेण कनिष्ठा चेदापि मातामह्याः सर्वाः प्रतिकूलताः अनुकूलतासु परावर्तितवती। यदि सा वचनैः श्वश्रूं बोधयितुं प्रायतिष्यत तर्हि सा प्रायः न अवारामिष्यत्। विशाखा आचरणेन दर्शितवती इत्यतः एव उत्तमः परिणामः आगतः।

(सर्वाः युवत्यः स्वधिया, विनयविधेयताभ्यां च ज्येष्ठानां सेवां कुर्युः। गृहे विद्यमानानां सर्वेषां समन्वयं कर्तुं च शक्नुयुः' इत्यस्याः कथायाः सन्देशः।'

**-संस्कृत शिक्षकः**

**डी.सी. आर्यः उच्चतम माध्यमिक विद्यालयः,**

**लोधी कालोनी नव देहली-११०००३**

# प्रत्यावर्तनम्

-डॉ. आभा झा

मध्यरात्रि: - अनुराधा सहसैव दूरभाषध्वनिं श्रुतवती- हेलो! आम्! अनुराधा ब्रवीमि। भवान् क:? हन्त! दु:खद: समाचार:। परम् एतावत् दूरत: किं कर्तुं शक्नोम्यहम्? आनन्द:? स: न तिष्ठति मया सह। न जाने स: कुत्र अस्ति? न जाने स: किमर्थं त्वं न सूचितवान्? मम मातृगृहे सर्वे जानन्ति आवयो: पार्थक्य-विषये। त्यजतु मातुल! नायम् अवसर: एतादृशानां कथानाम्। भवान् मातरं पृच्छतु स: कतिदिनेभ्य: तया सह वार्तां न कृतवानस्ति? कृतवानस्ति चेत् केन दूरभाषक्रमाङ्केन? प्रयासं करोतु सम्पर्कसाधनस्य? इति कथयन्ती अनुराधा वार्तां समापितवती!

दिनद्वयानन्तरम् यदा सा चिकित्सालये रोगिणां परीक्षणं कुर्वन्ती आसीत्, तदैव पुन: तस्या दूरभाषयन्त्रस्य घण्टिका ध्वनिता। तस्या चिकित्सासहायिका पृष्टवती- "भारतत: कोऽपि सम्भाषणं कर्तुमिच्छति, किं भवती वार्तां कर्तुं शक्नोति?" अनुराधा तां निर्दिष्टवती-तस्य नाम दूरभाषसंख्यां च पृच्छतु, अहम् कार्यं समाप्य तेन सह वार्तां करिष्यामि, इति विज्ञापयतु। रोगिणां परीक्षणकालेऽपि सा चिन्तयन्ती आसीत्- "क: भवितुं शक्नोति? मम पितरौ कदापि कार्यालयसमये वार्तां न कुरुत: तर्हि? --- किम् आनन्द:? न,न स: अमेरिकायां नास्ति फ्रैंकपर्टमध्ये अस्ति, इति तु अहं जानामि, परं तत्र कुत्र वसति? कुत्रास्ति तस्य आवास:? का वा तस्य दूरभाषसंख्या? अहं किमपि न जानामि। किमर्थं ज्ञास्यामि? क: सम्बन्ध: तेन सह? परं तस्य माता? किम् अहितं कृतं तया? तस्या: का दशा अस्ति? न जाने सा आनन्देन सह सम्पर्कं साधयितुं समर्थाऽभवत् न वा? परमहं किमर्थं चिन्तयामि? सा जानातु, तस्या: पुत्र: वा? परं तस्य पिता-स: दिवङ्गत:, गृहे माता एकाकिनी! पुत्रस्य कोऽपि समाचार: न ज्ञायते। अनिच्छन्ती अपि सा विचाराणां जाले आबद्धा जाता । बहु यत्नेन सा आत्मानं सन्तुलितां दर्शयन्ती कार्यजातं सम्पादितवती। कार्यं समाप्य चिकित्सासहायिकया प्रदत्तदूरभाषसंख्यामपश्यत्। किञ्चित् कालं विचार्य सा तस्मिन् क्रमाङ्के अङ्गुलिकां चालयामास?

रुदन्ती आनन्दस्य माता अवोचत्-पुत्रि! तव पिता दिवङ्गत:, आनन्दस्य कोऽपि समाचार: न प्राप्यते, स: कुत्रास्ति, किं करोति, किमर्थं वार्तां न करोति, किमपि न जानेऽहम्। तस्य पिता पुत्रस्य प्रतीक्षायां निबद्धदृष्टि: स्वशरीरमपि तत्त्याज, तस्य अन्तयेष्टि: अपि अभवत्। कोऽपि नास्ति मम समीपम्।

तव मातुलः एव सर्वां व्यवस्थां कृतवान्। सः एव उक्तवान् युवयोः पार्थक्यविषये। कदा घटिता इयं घटना?

मातः! भवती धैर्यं धारयतु। अधुना नास्ति अवसरः एतादृशानां कथानाम्। एकवर्षपूर्वमेव आवयोः विवाहः विच्छिन्नः।

परं त्वमपि मां न सूचितवती।

मातः! भवती आनन्दस्य माता। आनन्दः भवतीं न सूचितवान्, इत्यपि अहं न जाने। परं यदि भवती किमपि न जानाति, तर्हि एकवारमपि वर्षमध्ये मया सह न जल्पितवती? अहं तु चिन्तयामि स्म-भवती स्वपुत्रविषये सर्वं जानाति, अतएव मया सह न जल्पति।

परं किमभवत् पुत्रि? किं कारणं जातं येन युवां पार्थक्यं स्वीकृतवन्तौ?

मातः। त्यजतु एनां वार्ताम्, बहु प्रयत्नं कृत्वा अहम् तं दुःस्वप्नं विस्मृतवती अस्मि। अधुना अवसरः अपि नास्ति। भवत्याः कृते मम संवेदना अस्ति। दिवङ्गतपितुः आत्मा शान्तिमाप्नोतु इत्यापि प्रार्थये।

इत्युक्त्वा सा वार्तां समापितवती। परं विचारशृंखलायाः बहिः आगन्तुं न अशक्नोत्- श्वश्रूः अश्रूणि वारंवारं तस्याः हृदयम् आन्दोलितवन्तः। अस्यां विचलितमनोदशायां सार्धैकवर्षपूर्वं घटिताः घटनाः चलचित्रवत् नेत्रयोः समक्षं आगतवन्तः-

चिकित्सकीयाध्ययनस्य अन्तिमः वर्षः। पितरौ तस्याः विवाहार्थं चिन्तितौ। वरान्वेषणात् पूर्वं ताभ्याम् सह आलापः। स्पष्टवचसा अनुराधायाः कथनम्- मातः! पितः! मदर्थं वरान्वेषणं कुरुथः चेत् यः विदेशे तिष्ठति, तस्यैव अन्वेषणं कुरुतम्। अहं विशिष्टाचिकित्सकीयोपाधिं प्राप्तुं अमेरिकां प्रति गन्तुमिच्छामि। तत्रैव च वृत्तिं कर्तुमिच्छामि।

पुत्रि! अध्ययनार्थं गन्तुमिच्छसि चेत् गच्छ। येनकेनापि प्रकारेण अहं यात्राव्ययस्य व्यवस्थां करिष्यामि, परं तत्रैव वसतुमिच्छसि इति मह्यं न रोचते।-- पिता स्पष्टरूपेण उक्तवान्।

अथ किम्? भारते विशिष्टाध्ययनं कृत्वा, भारतस्य संरचनायाः लाभं गृहीत्वा, स्वकौशलस्य प्रदर्शनं विदेशे करिष्यसि इति अनुचितं प्रतीयते माम्। -मातापि अवोचत्।

मातः! त्यज अनुचितानुचितकथाम्। अहम् भारतस्य ऋणं न जानामि भवतोः ऋणम् जानामि। उच्चशिक्षां गृहीत्वा अहं स्वाजीवनं सुखमयं कर्तुमिच्छामि चेत् किमनुचितम्? अमेरिकादेशे चिकित्सालये अत्याधुनिकानि उपकरणनि विद्यन्ते, चिकित्सकानां कृते बहूनि सौविध्यानि सन्ति, प्रचुरं धनमस्ति। अत्र किमस्ति? निर्धनता, साधनहीनता, सर्वत्र राजनीतिः, भ्रष्टाचारः ।

अपरतश्च मम मनसि विदेशे वासं कुर्वतः वरस्य एव स्वप्नः विद्यते। अतएव यदि भवन्तौ प्रयासं कुरुतः, एतदर्थमेव कुरुताम्। एकेनैव पथा उभावपि कार्ये साधयिष्येते। पुत्र्याः स्पष्टं वचः आकर्ण्य

पितरौ तुष्णीम् अतिष्ठताम्।

पुन: विवाहसंस्थामाध्यमेन आनन्दस्य प्रस्ताव: आगत:। स: अमेरिकादेशे वसति स्म, वृत्तित: चिकित्सक: अस्ति, तस्य पिता भारते एव महाविद्यालये पाठयति, वंशश्चापि कुलीन:। इतोऽधिकं किं वाञ्छति कापि कन्या यथासंभव परीक्षणं कृत्वा अनुराधाया: सम्मत्या विवाहसम्बन्ध: निश्चित:।

मासद्वयाभ्यन्तर्गतमेव आनन्देन सह अनुराधाया: परिणय: सम्पन्न:। मासमेकं सुखस्य दोलायां दोलन्ती सा पत्या सह अमेरिकां प्रति प्रस्थिता। तत्र एकमासाभ्यन्तरमेव तत्र चिकित्सकीयमहाविद्यालये हृदयरोगक्षेत्रे विशिष्टाध्ययनाय प्रवेशं लब्धवती। तदनन्तरं तस्या: दिनचर्या गृहात् महाविद्यालयगमनम्, गृहमागत्यापि गहनमध्ययनम् एव अभवत्। आनन्द: मितभाषी आसीत्। सोऽपि स्वकार्ये व्यापृत: तिष्ठति स्म। प्रति रविवासरं सा स्वपितृभ्यां सार्द्धं दूरभाषेण जल्पति स्म। परम् आनन्द: कदा स्वपितृभ्यां साकं वार्तां करोतिस्म सा कदापि नावगच्छत्। शीघ्रमेव तया ज्ञातं यत् आनन्दस्य द्वे रूपे वर्तेते- तया सह निवसन् आनन्द: अपेक्षते परंपरां पालयतु अनुराधा पत्यु: आज्ञां पालयतु अनुराधा, वृथा प्रश्नं न पृच्छतु अनुराधा--

परं बहि: तस्य भिन्नं व्यक्तित्वं दृश्यते-उच्छृंखल:, पाश्चात्यसंस्कृतिपोषक: मर्यादाविहीन: व्यवहार:, मदिरापानरत:। कस्मिन् विश्वसतु अनुराधा? स्वमनोव्यथां कस्य समक्षं प्रकटयतु अनुराधा? नास्ति कोऽपि अन्तरङ्गसखी, न कोऽपि प्रतिवेशिनी, न निजभाषाभाषमाणा: जना:। पितरं प्रति निवेदयतु? न, तौ वृथैव चिन्तितौ भविष्यत:। विदेशीय: पति: तस्या: स्वप्न: आसीत्, पितरौ तु विवाहपर्यन्तं शङ्काकुलौ आस्ताम्।

एवमेव दिनं यापयति मासमेकं व्यतीतम्। सहसैव एका विदेशिनी गृहे प्राविशत्, अनुराधां च आग्नेयदृष्ट्या पश्यन्ती यद् रहस्योद्घाटनं कृतवती तद् तयो: सम्बन्धसमाप्ते: अन्तिम: काल: आसीत्। आनन्द: पूर्वत: एव विवाहित: आसीत्। अधुना किमपि नावशिष्टं कथनाय प्रश्नोपस्थापनाय च। सा तत्क्षणमेव गृहं त्यक्त्वा स्वसहपाठिन्या: गृहमगच्छत्। येनकेनापि प्रकारेण आत्मनाम् आश्वास्य सा अंशकालिकां वृत्तिं कृत्वा आजीविकाया: अध्ययनस्य च व्ययवहने समर्था जाता। कतिपयदिनानन्तरं सा स्वपितरं स्ववैवाहिकसम्बन्धस्य समाप्ते: विषये सूचितवती। दु:खितौ पितरौ वारंवारं भारतं प्रत्यावर्तुं कथितवन्तौ-न पित:! आनन्द: मां त्यक्त्वान् इत्यस्मात् कारणात् अहम् अध्ययनं त्यजामि? नैव। अहम् अत्रैव अध्ययनं कृत्वां वृत्तिं लप्स्यामि। भवन्तौ अपि अत्रैव आनेष्यामि। भवन्तौ मम चिन्तां मा कुरुताम्।

एवमेवाभवत्। वर्षाभ्यन्तरे सा विशिष्टोपाधिं प्राप्य तत्रैव चिकित्सालये कार्यं कर्तुमारब्धवती। षण्मासात् सा अत्रैव सेवाकार्यं करोति। तस्या: दिनचर्या नियमिता। सा सेवाकार्यं कृत्वा श्रान्ता भवति,

गृहमागत्य भोजनं पचति, खादति, स्वपिति। नास्ति तस्या: जीवने कोऽपि अभाव:।

परमद्य! किमिदं जातम्? आनन्दस्य मातु: दु:खेन सा किमर्थं दु:खिता अस्ति? तस्या: अश्रूणि किमर्थं तस्य मन: उद्वेलयन्ति? वारंवारम् स्वपित्रो: चित्रं किमर्थं समक्षमायाति? दैवदुर्विपाकेन तस्य मातृगृहे एवं भवति तर्हि----? सा रात्रौ निद्रामपि न लेभे।

रात्रौ बहुचिन्तनं कृत्वा, स्वमतिं स्थिरीकृत्य अपरस्मिन् दिने सा अधिकारिणे स्वत्यागपत्रं दत्तवती। आश्चर्यचकित: स: पृष्टवान्-काऽपि बाधा अस्ति अत्र? किमपि काठिन्यम् अनुभवसि? किमर्थं देदीप्यमानं भविष्यं त्यक्त्वा भारतं प्रति गन्तुम् इच्छसि? भवती पुन: एकवारं चिन्तयतु! यदि मनसि निश्चय: दृढ़, तर्हि अहं तव त्यागपत्रम् अग्रेसरं करिष्यामि। अद्य एकवारं पुन: चिन्तयतु-----

दृढ़स्वरेण अनुराधा उक्तवती- सम्यक् चिन्तितं मया। देशेऽस्मिन् अध्ययनस्य वृत्तेश्च अनुभव: प्राप्त: मया। अधुना मम देश: माम् आह्वयति। अहं तत्रैव सेवाकार्यं करिष्यामीति चिन्तयित्वैव त्यागपत्रं लिखितवती। भवान् मम पत्रं अग्रे प्रेषयतु। अहम् अत:परम् मासद्वयम् कार्यं सम्पादयिष्यामि। पुन: मम प्रत्यावर्तनं भविष्यति स्वदेशं प्रति, स्वनगरं प्रति स्वपितरं प्रति आनन्दातिरेकेन सा तत्क्षणमेव पित्रा दूरभाषयन्त्रेण सम्पर्कं कृतवती-

पित:! मासद्वयानन्तरं अहं स्वदेशम् आगमिष्यामि, भवतो: सार्द्धं निवसिष्यामि, भवान् प्रसन्नोऽस्ति अधुना!

आम् पुत्रि! प्रसन्नोऽस्मि। वर्षद्वयानन्तरं त्वम् अत्र आगमिष्यसि। कतिदिनपर्यन्तम् अत्र स्थास्यसि पुत्रि?

पित:। अहम् आगच्छामि। स्वदेशमागच्छामि, आजीवनं तत्रैव स्थास्यामि। मम प्रत्यावर्तनं भवति---- प्रत्यावर्तनम्।

**-११६ बी/६, अर्जुन नगरम्,**
**सफदरजंग-एन्क्लेव:,**
**नव देहली- ११००१६**

# परोपकारवैभवम्

-डॉ. धनंजयवासुदेवः द्विवेदी

लघुनागपुरम् अभितः सुरम्याणि काननानि स्थाने-स्थाने अनेके मनमोहकाः निर्झराश्च पर्यटकान् आकर्षयन्ति। एकदा अत्रत्यप्राकृतिकसुषमायाः अवलोकनक्रमे बहवः विश्वविद्यालयीयाः विद्यार्थिनः शिक्षकाश्च विभागाध्यक्षमहोदयस्य नेतृत्वे 'गौतमधारा'-जलप्रपातं गतवन्तः आसन्। तत्स्थानस्य नयनाभि-रामदृश्यं विलोक्य प्रमुदिताः विद्यार्थिनः अध्यक्षमहोदयस्य सम्मुखे एकत्रिताः सञ्जाताः। तेषाम् एका बलवती जिज्ञासा आसीत्। ते सादरं तम् ऊचुः-गुरुवर! साम्प्रतं युगस्य प्रभावात् अन्यकारणैर्वा मानवसमुदायस्य दैवीप्रवृत्तिः क्षीयमाणा दृश्यते आसुरीप्रवृत्तिश्च वर्धमानाऽऽस्ते। ते सांसारिकविषयभोगार्थम् अन्यायेन विपुलमात्रायाम् अर्थसञ्चयं कुर्वन्तः चारित्रिकप्रदूषणं वर्धयन्तः सन्ति। केचन् स्वार्थपूर्त्यर्थं केचन तु स्वार्थं विनाऽपि परहितविघातकाः दृश्यन्ते। अतः अस्माकम् इदं कौतुहलं विद्यते यत् अस्मिन् प्रदूषिते वातावरणे अस्ति कश्चित् नरः नारी वा यः स्वार्थं परित्यज्य परोपकारपरायणो भवेत्। यद्यस्ति तर्हि तत्सम्बन्धे एकां कथां श्रावयतु भवान् या अस्मत्कृते प्रेरणाप्रदायिका भवतु। प्रसन्नो भूत्वा गुरुवरोऽसौ परोपकारसम्बन्धिनाम् एकां लधुकथां तान् अकथयत्। तत्कथा इत्थमस्ति-

एकस्मिन् दिने सुशीला नाम्नी एका वृद्धा सीमन्तिनी समायाता मद्गृहे। धवलाम्बरा सा आत्मीयभावेन अस्मत्कुटुम्बिनां कुशलं ज्ञात्वा भृशं सन्तुष्टा जाता। मुहूर्तं विश्रामं कृत्वा आतिथ्यं स्वीकृतवती। तदनन्तरं सा स्वपरिवारस्य उन्नतेः रहस्यं सविस्तरं प्रकाशितवती।

तद्देव्याः पितुरालयः श्वसुरालयश्च आर्थिकदृष्ट्या साधारणौ तथापि उभयपक्षीयाः सर्वे जनाः सभ्या सत्कर्मपरायणाश्च आसन्। तेषां मनसि विश्वकल्याणकामना आसीत्। अन्येषां सुखसमृद्धिं दृष्ट्वा ते आनन्दानुभवं कुर्वन्ति स्म। अस्मिन् जगति सर्वे कर्तव्यपरायणाः जनाः सफलमनोरथाः सुखिनश्च सन्तु इति सर्वेषाम् आकांक्षा। तस्याः पतिः एकः लिपिकः। कथञ्चित् परिवारस्य कार्यं चलति स्म परन्तु सर्वे धर्मशीलाः। स्वल्पेऽपि साधने ते प्रायः सन्तुष्टाः आसन्। तेषां सम्पर्कः प्रगाढ़सम्बन्धश्च विशेषरूपेण सुशिक्षितैः सहृदयैः साकम् आसीत्। अन्येषां कार्यसाधने ते सदा उद्यता आसन्। प्रमादं परित्यज्य प्रतिवेशिनां सहायताकरणं तेषां जीवनदर्शनम्।

सत्कर्मकर्तृणां समये समये बहुविधां परीक्षां करोति भूतभावनो भगवान्। एकदा सुशीलाया पतिः स्वकार्यालयाद्वकाशं गृहीत्वा स्वग्रामं गतवानासीत्। संयोगात् तदवधौ एव त्रयः अतिथयः समागताः

सायंकाले शरत्काले। शैत्याधिक्यम् आसीत्। गृहे न तु अतिथिसेवायोग्या भोजनसामग्री न तु रात्रौ शयनार्थं शय्यादिकम्। क्षणं सा किंकर्तव्यविमूढा सञ्जता। अभावग्रस्ते गृहे अतिथिसत्कारः कथं भवेदिति शोचयन्ती सा चिन्ताकुलाऽऽसीत्। सहसा तस्याः मनसि एकः विचारः समागतः। तत्पार्श्वे सुवर्णस्य एकम् अंगुलीयकम् आसीत्। 'एतत् विक्रीय अपेक्षितवस्तूनि आनेतव्यानि आपणतः इति निश्चित्य सा त्वरितम् आपणं गतवती। तत्र कस्याचित् श्रेष्ठिनः पार्श्वे तदङ्गुलीयकं न्यासरूपेण रक्षित्वा ततः सहस्ररूप्यकाणि संगृह्य आपणतः अतिथियोग्यानि विविधानि वस्तूनि शयनस्य च यथोचितां व्यवस्थां विधाय सन्तुष्टा सञ्जाता सा देवी। अंगुलीयककृते तस्याः हृदि मनसाऽपि चिन्ता नासीत्।

**'परोपकारः पुण्याय पापाय परपीडनम्'** इति सिद्धान्ते तस्याः सुदृढो विश्वासः। तत्दृष्टौ संसारे परोपसदृशः कश्चित् धर्मः नास्ति। सुपात्राय जनाय स्वशक्त्यानुसारं किमपि अवश्यमेव देयम्। दानेन यदि परिवारे समस्याऽपि आयाति तत्कृते संतापः न कार्यः। दानेन प्रसन्नो भूत्वा भगवान् स केवलं क्षतिपूर्तिं करोति अपितुः दातुः गृहे भौतिकसुखसाधनान्यपि विस्तारयति। तदवलोक्य जनाः आश्चर्यचकिताः भवन्ति। विधातुः रहस्यमिदं सा सम्यगेव जानाति। तस्याः साहाय्येन अनेके जनाः गृहस्वामिनः सञ्जताः सन्ति। स्वकीयम् एकं सुन्दरं भवनमपि दाने दत्तवती सा।

दानस्य प्रसङ्गे देवी सुशीला कथयति यत् शास्त्रीयविधानानुसारमेव दानं देयम्। यद् द्रव्यं दाने दीयते तत् यथासम्भवं सत्पात्राय एव येन दत्तस्य दुरुपयोगः न स्यात्। प्रत्युपकारस्य फलस्य वा अभिलाषाः न करणीयः। शुद्धभावेन किमपि देयम्। दाने क्लेशानुभूतिः न भवेत्। इत्थं यत् द्रव्यं दीयते तत् बहुगुणीभूत्वा दातुः सदने आगच्छति। अनेन दातुः सुखसमृद्धिः सततं वर्धते। दानस्य परोपकारस्य वा इदमेव रहस्यम्।

वृद्धेयं जीवनस्य व्यापकम् अनुभवं धारयति। सुखदुःखयोः पर्यायेण गतागतं चलत्येव । नियतेः अनुग्रहं नैष्ठुर्यं च सम्यक् जानाति सा। 'कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा'। अस्याः परास्नातकपरीक्षोत्तीर्णः ज्येष्ठः सुयोग्यः पुत्रः केनापि अपहृतः। कृतेऽपि विपुलप्रयासे नैव सोऽधिगतः। कालक्रमे तस्याः वृद्धः पतिरपि पञ्चतत्वं गतः। एवं भूयिष्ठं प्रपीडिताऽपि एषा स्वजीवनस्यादर्शं नात्यजत्। देवाङ्गनेव पुण्यशीला सा शुभकर्मकसम्पादने एव स्वमनः स्थापितवती। तस्याः द्वे पुत्र्यौ द्वौ पुत्ररत्नौ इदानीं वर्तन्ते। शुभाचरणपरायणाः सर्वे। साधनाभावेऽपि स्नातकपरीक्षोत्तीर्णाः एते। मातुः पितुश्च पुण्यप्रभावात् सर्वे न्यायेन यथोचितं धनार्जनं कुर्वन्तः चकासन्ते। सर्वेषां सुख-समृद्धिः स्पृहणीया। सर्वे तथैव परोपकारपरायणाः आसन्। एतत्सर्वं दृष्ट्वा सुशीलादेव्याः मनसि हर्षातिरेकः आसीत्। तदवलोक्य बहवः जनाः विस्मिताः भवन्ति।

एकदा सुशीलादेव्याः व्यवहारैः विस्मितः एकः जनः परोपकारकरणस्य कारणं पृष्टवान्। सुशीलादेवी अकथयत्- अस्मिन् जगतीतले जनानां मध्ये दुर्जन-सज्जनरूपेण यो विभागो भासते, तेषु विभाजकगुणेषु यो

गुणो मूर्धन्यताम् उद्वहति, स एव परोपकारशब्देन निगद्यते। परोपकार: सृष्टेराधार:। परोपकार: एक: दिव्य: गुण: अस्ति। अनेन परोपकारस्य न केवलं परेषां कल्याणं भवति, अपितु आनन्दस्यानुभूतिरपि भवति। प्रकृति: तु परोपकारस्य व्यावहारिक: उपदेश: ददाति। वृक्षाणां फलानि, नदीनां जलं , गवां दुग्धं, सूर्यस्य प्रकाश: , पृथिव्या: अन्नानि सर्वं परोपकारार्थमेव। मानवमात्रस्य शोभा अलङ्कारै: न भवति तत्र तु परोपकार: एव प्रधान हेतु:। परोपकारिण: स्वशरीरस्यापि त्यागं कृत्वा परेषां रक्षां कुर्वन्ति। दधीचि: स्वस्य अस्थीनि दत्त्वा देवानां रक्षां कृतवान्। वस्तुत: परिवारस्य समाजस्य राष्ट्रस्य, विश्वस्य समुन्नति: परोपकारभावनया न भवति। अत एव परोपकारस्य महती आवश्यकता विद्यते मानवसमाजे।

'धनात् धर्म: तत: सुखम्' इति लोकोक्ति: साध्वेव। परन्तु अत्रत्या स्थिति: विलक्षणा। परिवारेऽस्मिन् धर्माचरणेनैव धनं सुखं च। धैर्यं सयम: शौचम् अहिंसा क्षमा भूतानुकम्पा कर्तव्यनिष्ठा परोपकारादय: धर्मस्य अवयवा:। यत्र एते गुणा: भवन्ति तत्र अभ्युदय: शान्ति: नि:श्रेयससिद्धिश्च ध्रुवा। एतद्विमुखा जना: आसुरीसम्पत्सम्पन्ना: भवन्ति। ते अन्यायेन धनराशिम् अर्जयन्ति। आपातत: ते वैभवशालिन: विलोक्यन्ते। परन्तु लोककण्टकानां पार्श्वे शान्ति: कुत:? सा तु पुण्याचरणेनैव प्राप्यते नान्यथा। परोपकारिणां कृते भगवान् स्वयं योगक्षेमवाहको भवति। परोपकारविघातकानां जीवनं शोचनीयं भवति। प्रकृति: भृशं प्रपीडयति तान् मोहजालसमावृतान् जनान्। प्राय: सर्वेषां ज्ञानिनामिदम् अभिमतमास्ते यत् दानस्य त्यागस्य परोपकारस्य च लाभ: अकल्पनीय: झटिति विपुलफलप्रदायका: इमे।

देवतेव सुशीलेयं स्वजनानाम् अन्येषां परिचितानां च कार्यसिद्धिं साधयति। ते स्वसमस्यासम्बन्धे किमपि कथयन्तु न वा परन्तु सा स्वजनानां समस्यां स्वसमेव जानाति। सा एवमेव तेषां कार्यं करोति। अनेके जना: तस्या: साहाय्येन विभिन्नसंस्थासु विभिन्नपदवीम् अवाप्य कृतकृत्या: सञ्जाता:। यं कमपि अधिकारिणं मन्त्रिणं धनिकं वा परोपकारार्थं निवेदयति स सद्य: तस्या: देदीप्यमानम् आननमवलोक्य प्रभावितो भवति। स्वसामर्थ्यानुसारं तत्समस्याया: समाधानं करोति च। तस्या: नामग्रहणेनापि सत्पुरुषाणां कार्यसिद्धिर्भवति। अनेके नरा: विभिन्ना: नार्यश्च तस्या: कृतज्ञा: सन्ति। धन्येयं नगरी यत्र भगवद्विभूतिस्वरूपेयं देवी निवसति। परोपकारस्य वैभवं खलु विलक्षणम्। कथामिमां श्रुत्वा सर्वे समुपस्थिता: विद्यार्थिन: परमाह्लादिता: सञ्जाता:।

गुरुवरं प्रति कृतज्ञतां प्रकाशयन्त: सर्वे विद्यार्थिन: तं कथितवन्त:- गुरुप्रवर! प्रेरणाप्रदां कथामिमां श्रुत्वा अस्माकं संशया: छिन्ना: तामसिका: भावा: तिरोहिता: राजसाश्च स्वाधीना: सञ्जाता: सत्त्वोद्रेक: विभाव्यते। परोपकारपरायणं जीवनं धन्यम्।

**-आर-२२/६,हरमू हाउसिंग कालोनी,**
**राँची,झारखण्डम्-८३४००२**

# परिश्रमशीलौ विद्या-वीरसिंहौ

-अनुराधा

एकस्मिन् ग्रामे वीरसिंहनामक: एक: बालक: निवसति स्म। तस्य मातुलस्य नाम जगदेव: आसीत्। वीरसिंह: स्वमातुलगृहे निवसति स्म यतो हि यदा स: स्वमातु: गर्भे आसीत् तदा एकस्यां दुर्घटनायां तस्य पिता दिवङ्गत:। स्वपत्यु: अकस्मात् मृत्युकारणात् अतिदु:खिता तस्य माता अपि पुत्रस्य जननान्तरमेव मृता, किन्तु मृत्यो: पूर्वं सा पुत्रपालनस्य सर्वं दायित्वं स्वभ्रातरं जगदेवं दत्तवती। तस्य भ्राता स्वभागिनेयं स्वगृहम् आनीतवान्, तत्रैव तस्य पालनं-पोषणं च कृतवान्। तस्य अपि त्रय: पुत्रा: आसन्। जगदेव: वीरसिंहाय स्वपुत्रापेक्षया अधिकं स्निह्यति स्म। एतद् सर्वं दृष्ट्वा तस्य भार्या बहु क्रुद्ध्यति किन्तु किमपि वक्तुं असमर्था आसीत्। सा वीरसिंहेन सार्धं बहु पक्षपातं करोति, स्वपुत्रान् प्रतिदिनं विद्यालयं प्रेषयति किन्तु वीरसिंहं गृहस्य कार्येषु नियोजयति। अत्यन्तं श्रद्धावान् वीरसिंह: गृहे मातुलान्या: सहयोगं करोति तथा च क्षेत्रेषु कृषिकार्ये मातुलस्य अपि सहायतां करोति। यद्यपि आदिनं कार्यकरणेन स: अत्यन्तं श्रान्त: भवति तथापि अध्ययनेच्छया प्रात: शीघ्रम् उत्थाय स्वमातुलपुत्राणां पुस्तकानि स्वीकृत्य अध्ययनं करोति स्म। स: बहु परिश्रमी आसीत्। निरन्तररूपेण कार्यं तथा च अध्ययनं कृत्वा स: कार्ये अध्ययने च निपुण: सञ्जात:।

एवमेव बहूनि वर्षाणि व्यतीतानि, वीरसिंहश्च विंशतिवर्षीय: जात:। एकस्मिन् दिने जगदेव: स्वमनसि चिन्तयति यत् इदानीं वीरसिंह: विवाहयोग्य: जात:। अस्ति, यदि समयेन अस्य विवाह: भवेत् तदा अहमपि स्वदायित्वात् निवृत्त: भविष्यामि। एवं विचिन्त्य तेन विवाहविषय: तेन स्वभार्याया: पार्श्वे उक्त:। 'मम पति: स्वपुत्रविषये न्यूनं, भागिनेयविषये एव अधिकं चिन्तयति' इति ज्ञात्वा सा खिन्ना, किन्तु कालान्तरे तस्या: मनसि विचार: समुत्पन्न: यत् वीरसिंहस्य विवाहेन गृहे एका सदस्या कार्यार्थम् इतोऽपि आगमिष्यति, येन मम साहाय्यं भविष्यति,मम कार्यभारश्च न्यून: भविष्यति। अत: तया वीरसिंहस्य विवाहार्थं स्वस्वीकृति: प्रदत्ता। शीघ्रमेव विवाहार्थं बालिकाया: अन्वेषणार्थं जगदेवेन सर्वत्र वार्ता प्रसारिता। जगदेवस्य अत्यन्तं प्रियं मित्रं सुभाष: आसीत्। तस्य ''विद्या नाम्नी एका पुत्री आसीत्। सा उत्तमा, परिश्रमी, गुणयुक्ता च आसीत्। सुभाषस्य स्वास्थ्यं सम्यक् न तिष्ठति स्म, तदर्थमेव तेन चिन्तितम्-'विद्यानिमित्तम् उत्तम: वर: कश्चन लभ्यते चेत् शीघ्रमेव तस्या: विवाहं करिष्यामि' इति। जगदेव: विद्यया सह वीरसिंहस्य विवाहप्रस्तावं स्वमित्राय दत्तवान्। वीरसिंह: एक: उत्तम: बालक:, परिवार: अपि उत्तम:, मम पुत्री विवाहानन्तरं मम मित्रस्य गृहमेव गमिष्यति इत्येतद् सर्वं विचिन्त्य प्रसन्नचित्त: सुभाष: विवाहार्थं स्वसम्मतिं: प्रदत्तवान्।

एकमासाभ्यन्तरमेव विवाहः सन्नः अस्ति। सम्पन्नः। विवाहानन्तरं सर्वं सम्यक् प्रचलति स्म। गृहकार्ये निपुणा सर्वाणि कर्त्तव्यानि उत्तमतया निर्वहति स्म। तस्याः व्यवहारेण परिवारे सर्वेऽपि प्रसन्नाः आसन् किन्तु मातुलानी तया सार्धम् सम्यक् व्यवहारं न करोति स्म। कार्ये लघ्वी त्रुटिः भवति चेदपि सा विद्यां बहु तर्जयति स्म। मातुलानी सर्वदा विश्रामं करोति विद्या च आदिनं कार्यसंलग्ना भवति स्म। मातुलः वीरसिंहः च कार्यार्थं आदिनं गृहात् बहिः एव भवतः अतः तयोः तु अस्मिन् विषये ज्ञानमेव न आसीत्। एकस्मिन् दिने 'अद्य अहं सर्वं वृत्तान्तं स्वपतिं विज्ञापयामि' इति विद्या चिन्तितवती। किन्तु कार्यकरणेन श्रान्तः वीरसिंहः भोजनं कृत्वा अचरिमेव शयनम् अकरोत्।

"स्वपितृगृहे स्वश्रुविषये वदामि चेत् ते अत्यन्तं कष्टम् अनुभविष्यन्ति" एवं विचिन्त्य सा न कुत्रापि स्वदुःखं प्रकटितवती। एवमेव त्रीणि वर्षाणि व्यतीतानि। जगदेवस्य पुत्राणामपि विवाहः सञ्जातः। गृहे तिस्रः नूतनाः वध्वः आगताः। विद्यया चिन्तितं यत् याः नूतनाः मम कनिष्ठाः आगताः सन्ति इदानीं मम साहाय्यं भविष्यति, किन्तु तस्याः इयम् आशा अपि निराशायां परिवर्तिता। विद्यया सह श्वश्रोः तादृशं व्यवहारं दृष्ट्वा नववधूनामपि व्यवहारः विद्यया सह तथैव जातः। ताः अपि तस्य सम्मानं त्यक्तवत्यः। अनेन विद्या अतीव दुःखिता अभवत्। यतो हि गृहे एकस्य जनस्य तादृशं निष्ठुरं व्यवहारं सोढुं सा शक्नोति स्म किन्तु सर्वेषां न, अतः एकस्मिन् दिने सा दृढनिश्चयः कृतः यत् अद्य सर्वां वास्तविकीं स्थितिं स्वपतये तथा च मातुलाय विज्ञापयामि। सौभाग्येन तस्मिन् दिने तौ द्वौ अपि शीघ्रं गृहम् आगतौ। गृहं प्रविश्य तौ दृष्ट्वन्तौ यत् विद्या एकाकिनी एव रोटिकां निर्माति स्म। अन्याः सर्वाः भोजनार्थम् उपविष्टाः आसन्। रोटिकाः निर्मीय यदा विद्या भोजननिमित्तम् उपविष्टा तदा मातुलानी ताः एव रोटिकाः निर्माति खादनार्थं दत्तवती याः निर्माणकाले ज्वलिताः आसन्। एतद् सर्वं तौ द्वारस्य बहिर्भागात् एव दृष्ट्वन्तौ अनन्तरं तौ प्रकोष्ठस्यान्तः प्रविष्टौ। यदा ताः सर्वाः जगदेवसिंह दृष्ट्वा लज्जाम् अनुभूतवत्यः। जगदेवसिंहेन विद्यायाः पार्श्वे गत्वा पृष्टम्- "पुत्री एतद् सर्वं किमस्ति" इति। तया सर्वा वास्तविकी स्थितिः उक्ता। इदानीं सर्वा स्थितिः स्पष्टा आसीत्। जगदेवसिंहः स्वपरिवारस्य व्यवहारकारणेन अतीव लज्जितः दुःखितः च जातः। तस्य मनसि अयमेव खेदः सञ्जातः यत् अहं स्वमित्रसुभाषस्य पुत्र्याः रक्षणं पालनं च सम्यगतया न कृतवान् इति। सः तु मयि अत्यधिकं विश्वसिति स्म, किन्तु अहं स्वकर्त्तव्यं सम्यक्तया न निरूढवान्। किञ्चित्कालं यावत् विचिन्त्य तेन उक्तं-"मम परिवारकारणात् विद्यायाः इयं स्थितिः जाता, अहमेव अस्याः समस्यायाः समाधानं करिष्यामि"। एकमुक्त्वा जगदेवः स्वप्रकोष्ठं गतः। तस्यः भार्या अपि अनुक्षणमेव प्रकोष्ठं प्रविश्य स्वपक्षे उक्तवती- "भो! भवान् किमर्थं तस्याः वार्तां शृणोति? सा तु मिथ्यावादिनी अस्ति। किं भवान् न जानाति गृहे अत्यधिकं कार्यं भवति यदि सा किञ्चित् कार्यं करोति तर्हि अत्र कः दोषः? मया अपि बाल्याकालात् आरभ्य वीरसिंहस्य लालनं -पालनं कृतमेव अस्ति। यदा भवान् वीरसिंह एव अधिकं स्निह्यति स्म , न मम पुत्रान्, तदा ममापि कष्टं

भवति स्म। मम जीवनं तु अन्येषां सेवायामेव गतः, इदानीम् अहं कार्यार्थम् अपि तान् न वक्तुं शक्नोमि किम्? मम अधिकारः नास्ति किमपि तेषाम् उपरि"। किन्तु इदानीं जगदेवः सर्वं ज्ञातवान् आसीत् अतः सः एकेनैव वाक्येन प्रत्युत्तरं दक्तवान्- "अस्मिन् विषये रात्रिभोजनानन्तरमेव वार्ता भविष्यति यदा सर्वे एकत्रिताः भवन्ति। प्रकोष्ठात् कानिचन महत्त्वपूर्णानि कर्गदानि स्वीकृत्या सः गृहात् बहिर्गतः। परिवारस्य सर्वे जनाः रात्रिकालस्य प्रतीक्षायाम् आसन्। रात्रौ सर्वे भोजनार्थम् उपविष्टाः किन्तु सर्वेषां मनसि अयमेव प्रश्नः आसीत् यत् भोजनानन्तरं किं भविष्यति इति। भोजनसमाप्त्यनन्तरं जगदेवेन उक्तम्- "अद्य मया एकः निर्णयः कृतः यत् यां भूमिं मम भगिनी (वीरसिंहस्य माता) मह्यं दत्तवती तां भूमिम् अहं वीरसिंहं ददामि यतोहि तत्र तस्य एव वास्तविकः अधिकारः वर्तते। श्वः आरभ्यः वीरसिंहस्य तथा च विद्यायाः निवासः अत्र न भविष्यति अपितु पुरातने गृहे भविष्यति। सर्वे तूष्णीं शृण्वन्तः आसन्, कस्यापि साहसं नासीत् जगदेवस्य पुरतः किमपि वक्तुम्, अतः सर्वे तूष्णीं शयनार्थं स्वप्रकोष्ठं गताः। तस्यां रात्रौ आरात्रिः कस्यापि निद्रा नागता। इदानीं गृहकार्याणि अस्माभिरेव करणीयानि भविष्यन्ति इति मातुलान्याः पुत्रवधूनां च एकतः महती चिन्ता आसीत्। अपरतः ताः प्रसन्नाः अपि आसन् यत् तयोः कृते तु पुरातनं गृहं दत्तम् इति। 'सर्वस्याः अपि परिस्थितेः दोषः अहमेव' इति विद्यायाः दुःखमासीत्।

बाल्यकालात् वीरसिंहः स्वमातुलेन सह वासमकरोत् तदर्थं तस्य किञ्चिदपि मन अन्यत्र गन्तुं नासीत्, किन्तु 'भवतः विद्याविषये च विचिन्त्य एव मया अयं निर्णयः स्वीकृतः' इति।

मातुलस्य उक्तवाक्यस्य कारणात् अग्रिमदिवसे कानिचन एव नित्योपयोगिनी वस्तूनि स्वीकृत्य तौ पुरातनगृहं गतवन्तौ। स्वश्रमेण विद्यया पुरातनगृहमपि निवासयोग्यं कृतम्, परिश्रमशीलौ तौ द्वौ अपि सर्वाणि कार्याणि मिलित्वा साध्यतः स्म। वीरसिंहः मातुलात् प्राप्तकृषिभूमौ परिश्रमं कृत्वा उत्तमानि शस्यानि उत्पादयति। गृहे गवादीनां पालनमपि कृतं, येषां दुग्धविक्रयणेन धनार्जनमपि भवति। सुखपूर्वकं अहर्निशं कार्यं कृत्वा दिनानि कथं गतानि तयोः ज्ञानमेव न अभवताम्। विद्यायाः द्वौ पुत्रौ तथा च पुत्री जाता। बालाः स्वगृहे स्वमातरं पितरम् च अहर्निशं परिश्रमं कुर्वन्ती पश्यन्ति। तेषु स्वपितृणां सर्वाः गुणाः समागताः आसन्। सुप्रसन्नाः सर्वेपि मिलित्वा कार्यं कुर्वन्ति। बालाः कुशाग्रबुद्धयः सन्तः कार्ये अध्ययने च निपुणाः अभवन्। विद्या स्वबालान् निरन्तरम् शिक्षयति- "पुस्तके पठितं जीवने आचरामश्चेद् तदैव पठितस्य सार्थकता भवति अन्यथा पठितः पाठः व्यर्थः भवति।

द्वितीयपक्षे मातुलस्य पुत्राणामपि बालाः जाताः आसन् किन्तु तेषां गृहस्य वातावरणं विपरितमेव आसीत्। सर्वे पुत्राः वध्वश्च परस्परं कलहमेव कुर्वन्तः भवन्ति। मातुलानी अत्यधिकं प्रयत्नं करोति यत् ते सर्वे मिलित्वा निवसेयुः किन्तु लघु-लघु विषयान् अपि अवगन्तुं तेषां सामर्थ्यं नासीत्। पुत्रवध्वः तु गृहकार्यनिमित्तमेव परस्परं कलहरताः भवन्ति स्म। भ्रातृणामपि परस्परं स्नेहयुक्तः व्यवहारः नासीत्। सर्वे

अपि अत्यधिकाः अलसाः आसन्। अध्ययनं तु सर्वैरपि कृतं किन्तु तदध्ययनं पुस्तकपर्यन्तमेव सीमितम् आसीत् न तु तेषां व्यवहारे। एतद् सर्वं दृष्ट्वा जगदेवसिंहस्य मनसि अत्यधिकं दुःखं भवति किन्तु सः किमपि न वदति। सः जानाति स्म यत् एतेषां व्यवहारे कदापि परिवर्तनं न भवितं शक्नोति। परिवारस्य आयः न्यूनः किन्तु व्ययः अधिकः आसीत्। तेषाम् आलस्यकारणात् कश्चन अपि तान् स्वसविधे कार्यार्थं न नियोजयति स्म। अतः कस्यापि पुत्रस्य पार्श्वे सम्यक् वृत्ति नासीत्। जगदेवस्य सम्पूर्णजीवने योजितधनेन एव गृहस्य निर्वहणं भवति स्म। शनैः-शनैः तद् धनमति समाप्तं, गृहे निर्धनता आगता, इदानीं सम्पूर्णः परिवारः दुखितः जातः।

एकस्मिन् दिने जगदेवसिंहस्य भार्या रुग्णा जाता। वीरसिंहः एतं विषयं ज्ञातवान्, सः गृहम् आगत्य स्वमातुलानीं चिकित्सालयं नीतवान्। कस्यापि पुत्रम् सविधे इदानीं स्वमातुः रक्षणार्थं धनं नासीत्। पञ्चदिनानि चिकित्सालये एव तस्या चिकित्सा अभवत्, तत्र विद्या तस्यै भोजनम् आनयति तथा च आदिनं श्रद्धया तस्या सेवां करोति। पञ्चदिनानन्तरं वीरसिहं तां गृहम् आनीतवान्, इदानीं सा स्वस्था आसीत्। 'अहं वीरसिंहेन तथा विद्यया सह अत्यधिकम् अन्यायं कृतवती आसम् किन्तु एते तु इदानीमपि तथावत् एव श्रद्धया मम सेवां कृतवन्तौ' इति विचिन्त्य मातुलानी आत्मग्लानिम् अनुभूतवती। वीरसिंहः स्वगृहं गन्तुम् उद्युक्तः एव आसीत् तस्मिन्नेव क्षणे मातुलानी आगत्य स्व अन्यायपूर्णव्यवहारस्य कृते क्षमायाचनां कृतवती तथा च विद्यायाः वीरसिंहस्य च स्नेहेन आलिङ्गनं कृतवा स्वपरिवाररक्षणाय निवेदनम् अकरोत्, मातुलः एतद् सर्वं दृष्ट्वा प्रसन्नः आसीत्। प्रसन्नः वीरसिंहश्च सर्वेषां मातुलपुत्राणां कार्येषु नियोजनं कारितवान्। सम्पूर्णपरिवारः इदानीं प्रसन्नः अस्ति।

## -शिक्षा-

**( १ ) उद्यमेन ( परिश्रमेण ) सर्वाणि कार्याणि सिद्धन्ति।**

**( २ ) यदि पुस्तके पठितं जीवने आचरामः तर्हि पठितस्य सार्थकता भवति अन्यथा पठितः व्यर्थः भवति।**

**- केन्द्रीयविश्वविद्यालयः,धर्मशाला,**

**हिमाचलप्रदेशः -१७६२१५**

# सं वो मनांसि जानताम्

-राहुलकुमारः

कश्चन युवा आसीत्। स दिल्लीविश्वविद्यालये पठति स्म। स मूलतः उडीसाराज्यतः आसीत्। स उच्चशिक्षायै देहलीम् आगच्छत्। स देहल्यां स्वकीयस्य महाविद्यालयस्य समीपे एकस्मिन् प्रकोष्ठे निवसति स्म। स एकवारं डेंगूपीडितः जातः। तस्य स्थितिः सम्यक् नासीत्। स बहु पीडितः आसीत्। तदा तस्य मित्राणि तम् एम्स-चिकित्सालये नीतवन्तः। पितरौ सूचनां प्राप्य शीघ्रमेव उडीसातः देहलीम् आगतवन्तौ। ततः परं स्वकीयस्य पुत्रस्य उपचारं कारितवन्तौ। स बालकः षड्दिवसान् यावत् चिकित्सालये आसीत्। तदनन्तरं तस्य पितरौ तं तस्यावासे आनीतवन्तौ अग्रिमदिवसे प्रातःकाले अल्पाहारानन्तरं तस्य पितरौ औषधस्य क्रयणार्थं एम्स-चिकित्सालये गतवन्तौ। स युवा प्रकोष्ठे एकाकी शय्यायां विश्राम्यन् आसीत्। किञ्चित् कालानन्तरं स दूरदर्शनं पिञ्जेन उद्घाटित दूरदर्शन समाचारः प्रचलन् आसीत्। तं समाचारं दृष्ट्वा क्षणेनैव तस्य शरीरे वेगेन कम्पनम् आरब्धम्।

दूरदर्शने समाचार आसीत् यत् एम्स-चिकित्सालये आतंकवादिनः आक्रमणं कृतवन्तः। पञ्चाशत् जनाः हताः शतश्च व्रणिताः सन्ति। ते आतंकवादिनः अधुनापि चिकित्सालये सन्ति। ते अष्टसंख्यकाः सन्ति। इमं वृत्तान्तं श्रुत्वा तस्य मनसि सन्देहानां सागरमिव उत्थितम्, यतोहि तस्य परिजनौ अपि तत्रैव आस्ताम्। स शीघ्रमेव पितरौ दूरवाणीम् अकरोत्। किन्तु कोऽपि दूरवाणीं न उत्थापितवान्। स लिखितसन्देशम् अपि प्रेषितवान्। किन्तु किमपि प्रत्युत्तरं न आगतम्। तदा स क्रन्दनम् आरब्धवान्। पित्रोः प्राणसंकटं कल्पयित्वा स दुःखसागरे पतितः जातः। तत्क्षणे तस्य पीडा असहनीया आसीत्। अकस्मात् प्रकोष्ठस्य विद्युतप्रवाहोऽवरुद्धः। विद्युद्भावे स प्रकोष्ठः अन्धकारे निमग्नः। किन्तु मनोशारीरिकस्वास्थ्यकारणात् स वातायनम् उद्घाटयितुम् असमर्थः आसीत्। सहसा स कस्यापि हसनं श्रुतवान्। तत्र कोऽपि जनः आसीत्। तेन कृष्णवस्त्रं धारितम् आसीत्, अन्धकारवशात् तस्य मुखं न दृश्यते स्म। युवकः रूद्धस्वरेण पृष्टवान् ''कोऽस्ति तत्र? किमर्थं हसन् अस्ति?

मम पित्रोः प्राणाः संकटे सन्ति तथापि भवान् हसन् अस्ति।'' स जनः उक्तवान् ''तर्हि किम् अभवत् एम्स-चिकित्सालये पञ्चाशत् जनाः हताः जाताः। द्वौ इतोऽपि मरिष्यतः। का चिन्ता? मृतसंख्या पञ्चाशततः द्विपञ्चाशत् भविष्यति।'' युवा क्रोधेन अवदत् ''भवादृशः निर्दयीजनः मया कदापि न दृष्टः। तौ केवलं द्वे जने न स्तः। तौ मम पितरौ स्तः। ताभ्याम् अहं पालितः पोषितश्च अस्मि। ताभ्यामेव मम

न्यूनाधिका: सर्वा: आवश्यकता: परिपूरिता: भवन्ति। तयो: अनुपस्थितौ मम भ्रातॄणां किं भविष्यति? वयं तु अनाथा: भविष्याम:। भवत: कृते संख्याद्वयम् अस्ति। मम कृते तु तौ मम संसारभूतौ स्त:।'' स जन: हसन् अब्रवीत् ''हा हा हा हा, भवत: स्मरणे किञ्चित् आयाति किम्? भवान् स एव खलु य: केभ्यश्चित् दिनेभ्य: पूर्वं समाचारपत्रं पठन् स्वमित्रम् अब्रूत यद् केदारनाथतीर्थस्थले आगते महाप्रलये द्विसहस्रपरिमिता: जना: मृता: जाता:। तदा संख्या सहस्र त: द्विसहस्रं कृता भवता। तदा तु संवेदनहीन: आसीत्।

यदा विजयदशमीपर्वणि अमृतसरनगरे रेलदुर्घटना अभवत्। तदापि भवत: मनसि किमपि कष्टं न अजायत। यदा केरलप्रदेशे जलप्रलय: आगत: आसीत् तदापि भवान् भावशून्य: आसीत्। केवलं धनदानम् एव भवता कृतम् आसीत्।'' तस्य जनस्य अनेन वचनेन तस्य पीडा इतोऽपि वर्धिता जाता। तथापि स पुन: अकथयत् '' तौ मम पितरौ स्त:। किन्तु तान् जनान् तु अहं जानामि एव न। स जन: उक्तवान् ''ये जना: प्रलये दुर्घटनायां वा मृता: जाता: तेऽपि केषाञ्चन मातर: पितरश्च। किन्तु भवान् कदापि तेषां विषये न अचिन्तयत्। भवता यत् महत् दु:खम् अधुना अनुभूयते। तेषां गृहजनै: अपि अनुभूतं किल। किन्तु भवान् समाचारपत्रं पठित्वा एवमेव मा चिन्तयतु यत् मृता: जना: अपरा: कदाचित् ते अपरा: स्वीया: अपि भवितुं शक्नुवन्ति। अस्माकं तु शास्त्राण्यपि भणन्ति।-

**अयं निज परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

तच्छ्रुत्वा स युवा विचारसागरे निमग्न:। तत्क्षणं अलार्मघण्ट्या: ध्वनि तस्य कर्णविवरेषु प्रविष्टा। पुन: स स्वमातु: ध्वनिं श्रुतवान् यत् पुत्र उत्तिष्ठ! उत्तिष्ठ पुत्र! प्रात:काल जात:। मया अल्पहार: निर्मित:। अल्पहारं कृत्वा ओषधं स्वीकरोतु। अद्य सायंकाले अस्माभि: रेलयानेन उडीसाराज्यं गन्तव्यम् अस्ति।'' मातु: एभि: वचोभि: स पुन: जीवित: जात:। इदं तस्य स्वप्नम् महती शिक्षा प्राप्ता। अनेन जागरणेन तस्य जीवने महती जागरूकता समुद्भूता। तेन निजस्य-परस्य च भेद: सम्यक् निरीक्षित: समाप्तश्च। तस्य मनसि समानताया: महती भावना समुद्भूता। याश्च प्रोक्ता: प्राक्काले ऋग्वेदे-

**सं गच्छध्व सं वदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥**

**- बी-४५,बंग्लो रोड, कमलानगरम्,**
**नव देहली-११००४७**

# धनस्य सदुपयोगः

-पं.सत्यवीर शास्त्री

अस्ति मलेशियानामराष्ट्रे स्वस्थशरीरः स्वभावमधुरः सुशीलः सुशिक्षितः सत्यवादी धर्मात्मा कमलनयनः गौरवर्णः राबर्टगीथः नाम महाधनिकः। स च सर्वसुखसंपन्नः पञ्चनवति वर्षीयः वृद्धः वर्तते। एकस्मिन् दिवसे सः स्वकीयवहित्रेण समीपस्थं सर्वोपचारकेन्द्रं अगच्छत्। तत्र रुग्णानां महती पंक्तिः आसीत्। सः पंक्तौ सम्मिलितः यदा तस्य क्रमाङ्कः आगतः तदा चिकित्सकेन पृष्टम्-''भो, किं ते भवति? का ते पीड़ा? शिरसि पीडा भवति वा शरीरावयवेषु? राबर्टगीथः अवदत् 'न मे पीडा, न अहं रुग्णः। न केनापि व्याधिना पीडितः अस्मि। चिकित्सकेन विचारितम्- ''तर्हि भवान् किमर्थं समागतवान्। राबर्टगीथः अवदत् एकं प्रश्नं पृष्टुम् आगतः अस्मि। चिकित्सकः अभणत् पृच्छतु भवान्। राबर्टगीथः अपृच्छत् ''अहं कदा मरिष्यामि? चिकित्सकः अब्रवीत् ''अयि, महोदय, किमपि विचित्रं प्रश्नं पृच्छति भवान्। न अहं दैवज्ञः (ज्योतिषी) कमपि दैवज्ञं प्रति गत्वा विचारयतु भवान्। अहं तु रोगान् परीक्ष्यामि, न तु जन्ममरणम्। किन्तु राबर्टगीथः पुनः पुनः प्रार्थयत, अकथयत् च। भो, चिकित्सक महोदय, यथा ''चिकित्सका शरीरावयवान् निरीक्ष्य'' मनुष्यः कति वर्षीयः इति कथयन्ति तथा एव कदा मरिष्यति इति अपि कथयितुं शक्यते तदा चिकित्सकेन राबर्टगीथस्य रक्तं मूत्रं रक्तचापं शरीरस्य सर्वाणि अवयवानि आधुनिकयंत्रैः सम्यक् परीक्ष्य निदानं कृत्वासप्तदिनानन्तरं निर्णयं (अहवाल) दत्तवान्। यथा ''भवान्- षड्मासपर्यन्तं न मरिष्यति। तद् पश्चात् कदा कस्मिन् स्थाने मरिष्यति इति कथयितुं न शक्यते'' इति। राबर्टगीथः निर्णयं-निशम्य प्रसन्नवदनः स्वनिवासस्थानं आगतः।

नगरे राबर्टगीथस्य नव निवासस्थानानि। पञ्च तैलं निर्मितुः उद्योगालयः आसन्। महती कृषिः भूमि आसीत्। तस्य समीपे रत्न-माणिक्य-भौक्तिकसंयुक्तानि बहूनि स्वर्ण-आभूषणानि आसन्। दश चतुर्चक्र-वाहनानि आसन्। वित्तकोषे' अष्टसप्ततिलक्षरूप्यकाणि आसन्।

तद् पश्चात् राबर्टगीथः स्वसचिवं आदिशत् '' मम सर्वसंपत्तीः विक्रय'' सचिवः राबर्टगीथस्य यावती संपत्तिः आसीत् तासु राबर्टगीथस्य पुत्रस्य कृते एकभागं निधाय त्रीन् भागान् व्यक्रीणात्। आगतानां रूप्यकाणां लक्षमेक रूप्यकाणां एकं इति बंधनं (बंडल) कृतवान्। सर्वाणि-रूप्यकाणि अब्जद्वयं आसीत्।

तद् पश्चात् राबर्टगीथमहोदयेन नगरस्येषु सर्वेषु दैनिकवृत्तपत्रेषु साप्ताहिकेषु पाक्षिकेषु मासिकेषु आकाशवाणिकेन्द्रेषु दूरदर्शनकेन्द्रेषु विज्ञापनानि प्रकाशितानि। यथा- ''अहं राबर्टगीथः मम जन्मदिने

सितम्बरमासस्य पञ्चदशदिनाङ्के मम समीपस्थानि सर्वाणि रूप्यकाणि दानं करिष्यामि''। दानं ग्रहितुं ईदृशाः योग्यताः धारकाः समागच्छन्तु।

(१) दानं ग्रहणाय ते निर्धनाः गृहविहीनजनाः समागच्छन्तु येषां समीपे ''स्वकीयनिवासस्थानं नास्ति'' इति सर्वकारस्य प्रमाणपत्राणि विद्यन्ते।

(२) दानं ग्रहणाय ते अधनाः आगच्छन्तु ''येषां कुमारिकाकन्यकाः सन्ति। किन्तु धनाभावेन स्वकन्यकानां विवाहकारयितुं असमर्थाः संजाताः। ते अपि ''अतीव अधनः पुरुषः'' इति, सर्वकारस्य प्रमाणपत्रं गृहीत्वा आयान्तु।

(३) दानं ग्रहणाय ते अपि दीनाः आयान्तु येषां समीपे मण्डल प्रमुखचिकित्सकस्य '' शरीरव्याधिविषयक- प्रमाणपत्राणि वर्तन्ते। यथा- 'कर्करोगग्रस्तरुग्णाः। क्षयरोगिनः। मूत्रपिण्ड। निष्क्रीयजनाः। हृदयपीडितरुग्णाः ये धनाभावेन हृदयस्य शस्त्रक्रियां कर्तुं असमर्थाः। दानगृहितुकामैः सहपरिवारेणं आधारपत्रस्य प्रतिलिपिं गृहीत्वा आगन्तव्यम्।

दानवितरणस्य पूर्वदिने राबर्टगीथ महोदयस्य निवाससदनं विविधवर्णविद्युत्दीपैः दीपावली इव सुशोभितम् आसीत्। त्रीणि स्वागतद्वाराणि। प्रथमद्वारे लिखितं आसीत् '' सुस्वागतम्''। द्वितीयद्वारे लिखितं आसीत् '' दानं सुखस्य साधनम्।'' तृतीयद्वारे लिखितम् आसीत् ''दानवितरणसमारोहः''।

दानवितरणसमारोहः तु दिने दशवादने प्रारम्भः भविष्यतिस्म। किन्तु दानग्रहितुकामाः दीनाः स्त्रिपुरुषाः प्रातः एव सप्तवादनात् आगन्तुं प्रारभत। ते मनसि विचारयन्तः '' किं राबर्टगीथमहोदयः सत्यमेव दानं वितरिष्यन्ति अथवा स्वागतमात्रं करिष्यन्ति। दानी पुरुषः विरलः भवति। उक्तं च वर्तते। यथा-

**शतेषु जायतेः शूरः, सहस्रेषु च पण्डितः।**
**वक्ता दशसहस्रेषु, दाता भवति वा न वा॥**

दानवितरण समारोहमण्डपस्य पृष्ठभागे अभ्यागतानां कृते जलपानस्य उष्णपेयस्य प्रबंधः आसीत्। बालकानां कृते मिष्ठान्नस्य रसपानस्य व्यवस्था आसीत्। सर्वे उष्णपेयं वा रसपानं पीत्वा मण्डपं प्रविशन्ति स्म। इत्थं शीघ्रमेव आबालवृद्धैः सभामण्डपं परिपूर्णं जातम्।

दानवितरणसमारोहपटमण्डपस्य मध्यभागे नयनरमणीयं मञ्चकं आसीत्। मण्डपस्य वामपार्श्वे पत्रकाराणां कृते श्वेतवर्णाः आसन्दिकाः आसन्। दक्षिणपार्श्वे नागरिकजनानां कृते पीतवर्णाः आसन्दिकाः आसन्। मञ्चकस्य अग्रभागे दानं ग्रहणाय आगतानां दीनानां कृते आसन्दिकाः आसन्। मञ्चकस्य उपरिभागे श्वेतपट्टे स्वर्णाक्षरैः लिखितं आसीत् ''दानवितरणसमारोहः''।

यदा संयोजकेन उद्घोषितं ''समारोहस्य अध्यक्षमहाभागाः समागताः तदा सर्वे उपस्थिताः जनाः तालिकावादनं अकुर्वन्। तालिकावादनध्वनिना गगनं परिपूर्णम् जातम्। स्थानापन्ने-अध्यक्ष-महोदये संयोजकः उक्तवान् ''अधुना अहं प्रमुख-अतिथीन् प्रार्थये ते अपि स्वं स्वं स्थानं अलं कुर्वन्तु। तदा सर्वे प्रमुख-अतिथयः यथास्थानं उपविष्टाः। पश्चात् संयोजकः अवदत् ''अधुना-शारदास्तवनं भविष्यति। तदा बालिकाभिः स्तवनं कृतम्। यथा-

**या कुन्देन्दुतुषारहारधवला, या शुभ्रवस्त्रावृता।**
**या वीणावरदण्डमण्डितकरा, या श्वेतपद्मासना॥**
**या ब्रह्माच्युतशंकरप्रभृतिभिः, देवैः सदा वन्दिता।**
**सा मां पातु सरस्वती भगवती, निःशेषजाड्यापहा॥**

समाप्ते शारदास्तवने वाद्यवृन्देन स्वागतगीतं ध्वनितम्, तत्पश्चात् संयोजकः अध्यक्षमहाभागेभ्यः प्रमुख-अतिथिभ्यः शालश्रीफलानि दत्वा पुष्पमालाभिः स्वागतं कारितवान्। पश्चात् उपस्थितैः सर्वैः जनैः राबर्टगीथमहोदयस्य जन्मदिवसनिमित्तेन प्रार्थना कृता ते अवदन्-

**सुदिनं सुदिनं जन्मदिनम्''**
**भवतु मङ्गलम् जन्मदिनम्॥**

हे राबर्टगीथ, महोदयः भवान् आयुष्मान, तेजस्वी, श्रीमान् भवतु। पश्चात् राबर्टगीथमहोदयः स्वमनोगतं कथितवान् ''अहं मम जन्मदिने स्व ईच्छया दानं करोमि। मम कामना अस्ति-

**सर्वेभवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वेभद्राणि पश्यन्तु, मा कश्चिद् दुःखभागभवेत्॥**

इति मम मनोरथः।

पश्चात्-साम्प्रतं दानवितरणं भविष्यति इति कथयति संयोजके-मण्डपस्थाः जनाः पञ्चपलानिपर्यन्तं तालिकावादनं कृतवन्तः। दानं ग्रहितुकामाः तु अतीव दक्षाः जाताः। ते सावधानमनसा संयोजकस्य वचांसि अशृण्वन्। मण्डपे निश्वस्तब्धता संजाता। तदा संयोजकः दानं ग्रहितु कामानां अभ्यर्थिनां नामानि वाचयितुं प्रारभत। स यस्य नाम उद्घोषयति स दानार्थी मञ्चे आगत्य अध्यक्षात् अथवा, प्रमुखअतिथिहस्तात् रूप्यकाणां बंधनं (बंडल) गृहीत्वा अध्यक्षमहोदयाय, प्रमुखअतिथिभ्यः राबर्टगीथमहोदयाय प्रणम्य स्वकीयं स्थानं आगम्य उपविशति स्म। मञ्चे-मण्डपस्थाः सर्वे जनाः अतीव प्रसन्नाः आनन्दिताः आसन्

गृहविहीन याचकेभ्यः पञ्चदशलक्षरूप्यकाणि दत्तानि। स्वकन्या विवाहकर्तुकामेभ्यः दश-दश लक्षरूप्यकाणि वितरितानि। क्षय-हृदयपीडितरुग्णेभ्यः पञ्च-पञ्च लक्षरूकाणि दत्तानि एवं प्रकारेण दानं वितरणम् संजातम्।

अध्यक्ष महोदयः अध्यक्षीयभाषणे समुपदेशितवान् अस्मिन् जगति धनस्य महत्त्वं अपूर्वम् । धनेन एव सर्वाणि कार्याणि सिध्यन्ति। धनवान् पुरुषः एवः पूजनीयाः माननीयः भवति। किन्तु धनस्य सद उपयोगेन दु:खिताः आर्त्तः जनाः सुखिनः भवन्ति। चाणक्येन लिखितं अस्ति।

**धनस्य तीस्रः गतयो, दानं भोगो नाशश्चेति।**
**यो न ददाति न भुङ्क्ते, तस्य च तृतीया गतिः ॥**

अर्थात्- धनस्य त्रयः उपयोगाः 'दानकरणम्' 'स्वयमेवधनव्ययकरणम्' यः धनिकः दानं न ददाति, स्वयमर्थे व्ययं न करोति, तस्य उपरते तस्य धनस्य नाशः भवति। अतः अहं राबर्टमहोदयस्य अभिनन्दनं करोमि। राबर्टमहोदयेन यत् कृतं तद् प्रशंसापदं कार्यकृतमस्ति। अहं दानं-गृहीतवान् निवेदयामि 'यत् ते यस्मै-यस्मै कार्यनिमित्ताय दानं गृहीतवन्तः तस्मै-तस्मै कार्याय एव रूप्यकाणां व्ययं कर्तव्यम्। अस्मिन् समारोहे अध्यक्षरूपेण मां आहूतवान् अतः अहं संयोजकस्य आभारी अस्मि। इति कथयित्वा अध्यक्षीयभाषणं समाप्तं करोमि। इति कथयति तस्मिन् समये तालिकावादनं जातम्।

अन्ते राबर्टगीथस्य सचिवः अध्यक्षमहोदयानां प्रमुख-अतिथि- जनानां दानवितरणसमारोहे आगतानां दानग्रहितुणां सर्वेषां जनानां आभारप्रदर्शनं कृतवान् । तदा राष्ट्रगीतेन सह दानवितरण समारोहः समाप्तः।

**-प्रशान्त नगरम्**
**समीपस्थ केने गोधूम चक्की,**
**जनपद-अमरावती**
**( महाराष्ट्रम्-४४४६०६ )**

# पिहितं सूर्यबिम्बम्

-दत्तात्रेयः अनन्तः उपाध्ये

अद्य तस्याः माध्यमिकशालायाः प्रथमसत्रस्य प्रथमदिनम्। सप्तमीं कक्षायाम् उत्तीर्य अष्टम्यां प्रवेशप्राप्तवन्तः सर्वे नवागताः छात्राः अतीव प्रसन्नाः, उत्साहिनश्च। कक्षायां एकस्य छात्रस्य अभिनन्दनं कुर्वन्तः सर्वे छात्राः। वारं वारं! तत्तु उचितमेव, यतः तेन छात्रेण प्राथमिकशिक्षाप्रमाणपत्रपरीक्षायां (सप्तम्यां) त्रिसप्ततिः अङ्कैः सह नगरे प्रथमः क्रमाङ्कः प्राप्तः! सा परीक्षा अतीव महत्त्वपूर्णा खलु । अष्टम्यां कक्षायां प्रवेशार्थं सा अनिवार्यै व। तथा च सा परीक्षा अतीव कठिनापि । न शालयाः, अपि तु सर्वकारस्य प्राथमिकशिक्षाप्रमाणपत्रमण्डलस्य परीक्षा सा। तस्यां नैकाः छात्राः अनुत्तीर्णाः अपि भवन्ति। यद्यपि अत्र आगतैः सर्वैः छात्रैः सा परीक्षा उत्तीर्णा तथापि त्रिसप्ततिः अङ्कास्तु अपूर्वं यशः । अतः तस्य अभिनन्दनं सर्वथैव उचितमेव।

तस्यां कक्षायां एकस्मिन् कोणे उपविष्टः एकोऽन्यः छात्रः। एकस्मिन् धनहीने ब्राह्मणकुले जातः सः, एकस्मात् अतीव लघ्वीयसः ग्रामात् आगतवान् । पिता ग्रामपुरोहितः। कुटुम्बस्य किञ्चित् कृषिक्षेत्रम्। पिता पौरोहित्येन सह कृषिकार्याण्यपि कुर्वन् अस्ति। तेन परिवारस्य चरितार्थः यथातथा चलति। पितरि आवश्यकं तावत् पौरोहित्यस्य ज्ञानं तु विद्यते, तथापि पाठशालीय शिक्षा कापि नास्ति। 'मम पुत्रः अधिकाधिकां शिक्षां प्राप्नुयात्' इति तस्य महती कांक्षा। तथापि एतत् कथं भवेत्, पर्याप्तेन धनेन विना नगरे पुत्रस्य निवासस्य प्रबन्धः कथं भविष्यति, इति तस्य महती चिन्ता।

तदानीमेव, दैवयोगात् , तस्य श्यालकः तं मिलनार्थं आगतवान्। तस्य पुरतः तेन ब्राह्मणेन स्वसमस्या निहिता। श्यालकः सत्वरम् अवदत्,

'चिन्ता मास्तु। त्वं तु जानासि मम कापि सन्ततिर्नास्ति, न पुत्रः न पुत्री। अतः यावत् तव पुत्रः नगरे वत्स्यति तावत् सः ममैव पुत्रो भविष्यति। तावत् तु अहं पुत्रसुखं अनुभविष्यामि।'

अतः तेन सप्तम्याः अनन्तरं माध्यमिकशिक्षार्थं स्वपुत्रः नगरं प्रेषितः। श्यालस्तु एतस्मिन् नगरे देवालयस्य अर्चकः। सः तु देवालये एव निवसति तथैव पुत्रोऽपि।

एतस्य अतीव आधुनिकस्य नगरस्य छात्राणां पुरतः सः हास्यविषय एव जातः। सर्वेषां छात्राणां वेषभूषा, केशभूषा च अत्याधुनिका। प्रायः सर्वैः छात्रैः नूतनानि, चित्राणि वस्त्राणि धृतानि। केशविन्यासस्तु

अप्रतिमः। तेषां पुरतः एतस्य बालकस्य वस्त्राणि अतीव दीनानि। गतवर्णम् अर्धोरुकं, घनकार्पासस्य युतकं, शिरसि श्वेतः शिरस्कः यस्मात् बहिः आगता तस्य शिखा। कक्षायां सर्वे तस्य उपहासं कृतवन्तः। लक्ष्यं कृत्वा ते सततं जलपन्तः।

**'शिरस्कधारिन् नमो नमस्ते', 'शिखाधारिन् नमो नमस्ते' ।**

**एकः उद्धतः छात्रस्तु तस्य समीपे गत्वा अवदत्,**

'रे ग्रामलोष्ट! अस्माकम् अस्य बुद्धिमतः मित्रस्य अभिनन्दनं कृतं किं त्वया? तेन त्रिसप्ततिः गुणाः प्राप्ताः, न जानासि किं?'

सः वराकः बालकः अभिनन्दनार्थं तस्य बुद्धिमतः छात्रस्य समीपे अगच्छत्। अभिनन्दनं कृत्वा हस्तान्दोलनं कर्तुम् ऐच्छत्। तथापि सः बुद्धिमान् छात्रः किमपि अवधानं न अददात्। प्रत्युत अतर्जयत्, 'अस्तु, अस्तु, गच्छ तव आसनं प्रति।'

एतस्मिन् विशाले नगरे, न तस्य बालकस्य कोऽपि परिचितः,न किमपि मित्रम्। एतादृशम् अपरमितम् उपहासं सोढुम् असमर्थः सः एकस्मिन् कोणे उपविष्टः।

--बहिः आकाशे कृष्णमेघानां सम्पर्दः। तैः पिहितं सम्पूर्णं सूर्यबिम्बम्। कदापि तुमुला वृष्टिः भविष्यति इति गम्यते!

--सहसा छात्राणां कोलाहलः व्यरमत् यतः मुख्याध्यापकः कक्षायां प्राविशत्। मञ्चे उपविश्य छात्रान् उद्दिश्य सुहास्यवदनेन सः अवदत्,

'नगरस्य एतस्मिन् सर्वोत्तमे विद्यालये भवतां सर्वेषां स्वागतम्। अहम् अत्र मुख्याध्यापकः। भवन्तः सर्वे एतस्मिन् विद्यालये उत्तमं ज्ञानं, उत्तमा विद्या तथा च उत्तमान्: संस्काराञ्च लभेयुः एतदर्थं विद्यालयस्य वयं सर्वे अध्यापकाः, कर्मचारिणश्च सततं प्रयत्नवन्तः। तथापि कस्मिंश्चित् अवसरे भवतां पुरतः कापि समस्या, कष्टं वा आपतति चेत, भवन्तः भयेन विना, कदापि, कुत्रापि मम समीपे आगच्छन्तु। अहं तस्याः समस्यानिवारणम् अग्रक्रमेण करिष्यामि। भवन्तः अपि सर्वे विहितस्य अनुशासनस्य पालनं करिष्यन्ति इति अपेक्षा। अस्तु, इदानीं भवन्तः भवतां परिचयं ददातु। क्रमशः एकैकशः छात्रः स्वनाम तथा सप्तम्यां कक्षायां प्राप्तान् गुणान् कथयतु। नाम्ना वैयक्तिकपरिचयः तथा गुणैः आकलनशक्तेः परीक्षणम् भवति।'

यथा आचार्येण आदिष्टं तथा एकैकः छात्रः स्वस्थाने उत्थाय स्वनाम तथा प्राप्ताः गुणाः कथयितुम् आरभत। यदा तस्य बुद्धिमतः छात्रस्य क्रमः आगच्छति, सः उत्तिष्ठति च, तदैव कक्षायां सर्वे छात्राः उच्चैः करतालं कुर्वन्ति। चकितः मुख्याध्यापकः पृच्छति,

'किमेतद्?'

तदा एकः छात्रः उत्तरति,

'आचार्य, एतेन, अस्माकं मित्रेण नगरे प्रथमक्रमाङ्कः प्राप्तः'

अतीव मुदीतः मुख्याध्यापकः स्वयमपि करतालं कुर्वन् वदति,

'अत्युत्तमम्! कति गुणाः प्राप्ताः त्वया?'

उन्नतमुखः सः छात्रः वदति,

'त्रिसप्ततिः आचार्य!'

अभिनन्दनं, त्रिवारं अभिनन्दनम्! एतादृशः बुद्धिमान् छात्रः एतस्य विद्यालयस्य भूषणं खलु!'

इत्युक्त्वा आचार्यः स्वयं तस्य समीपे गच्छति, हस्तान्दोलनं च करोति।

अनन्तरं केचन अन्ये छात्राः स्वपरिचयं ददाति। तत्पश्चात् तस्य ग्रामीणस्य छात्रस्य क्रमः आगच्छति। भयभीतः,लज्जितः,हतोत्साहः, अधोमुखः स छात्रः महत्प्रयासेन स्वस्थानात् उत्तिष्ठति। सदैव एकः छात्रः उच्चैः गर्जति,

'शिरस्कधारिन् नमो नमस्ते।'

अन्यः सत्वरम् अनुवदति,

'शिखाधारिन् नमो नमस्ते।'

एतेन मर्यादातिक्रमेण कुपितः मुख्याध्यापकः तर्जयति,

'तूष्णीम्! कस्यापि एतादृशः मानसिकः, शारीरिकः वा, अधिक्षेपः, अत्र दण्डनीयः अस्ति इति सर्वे स्मरन्तु!'

अनन्तरं सः तं ग्रामीणं छात्रं पृच्छति,

'वत्स कुतः आगतोऽसि? किं ते नाम?'

अधोवदनेन एव सः स्व नाम तथा स्वग्रामस्य नाम च कथयति।

'का ते पितुः वृत्तिः?' मुख्याध्यापकः अग्रे पृच्छति।

'पौरोहित्यम्।'

'उत्तमम्! अतीव पवित्र वृत्तिः सा। सप्तम्यां कत्याङ्काः प्राप्तास्त्वया?'

इतोऽपि अधोमुखः सः उत्तरति,

'पञ्चाशीतिः।'

सहसा कक्षायां तडित्पातः! न केवलं सर्वे छात्राः दीर्घमुखाः , मुख्याध्यापकस्यापि स्वकर्णयोः न विश्वासः।

'प्रायः मया सम्यक् न श्रुतम् !' सः अचिन्तयत्। अतः सः पुनः अपृच्छत्,

'पञ्चाशत् वा?'

'न, न, आर्य, पञ्चाशीतिः।'

'कथमेतद् शक्यं वत्स? राज्ये येन प्रथमं स्थानं प्राप्तं तस्यैव एते गुणा:, एतत्तु अहं जानामि।'
सः किमपि न अवदत्। केवलं मुख्याध्यापकं उपगम्य स्वगुणपत्रिकां अदर्शयत्।

तां दृष्ट्वा मुख्याध्यापका: प्रथमं तु अतीव चकित: , अनन्तरं तस्य प्रतिक्रिया अभूतपूर्वैव! तेन तस्मै बालकाय मञ्चैव दृढालिङ्गनं दत्तं! तथा सा पत्रिका सर्वान् छात्रान् दर्शयित्वा सः अवदत्-

'भोः , येन राज्ये प्रथमं स्थानं प्राप्तं सः अनन्यः छात्रः अस्माकं विद्यालये आगतवान्। वयम् तस्य स्वागतम् करिष्यामः , उच्चैः करतालैः।' कक्षायां न भूतं न भविष्यत्यीति करतालगर्जनं सम्भूतम्।

'त्वं तु ग्रामात् आगतोऽसि। एतस्मिन् नगरे कुत्र निवससि?' मुख्याध्यापकाः अनुकम्पया तं छात्रं अपृच्छत्।

'एकस्मिन् देवालये आर्य, एकेन अर्चकेन सह। सः मम मातुलः।'

'देवालये किम्? अस्माकं विद्यालयस्य भूषणानां भूषणम् त्वम्! इतः परं तव निवासस्य, भोजनस्य च प्रबन्धः विद्यालयस्य वसतिगृहे भविष्यति, निःशुल्कः। त्वं सर्वकारतः विद्यावेतनमपि अर्हसि, इति त्वं प्रायः न जानासि। तदर्थं उचितं प्रबन्धं विद्यालय एव करिष्यति। त्वं तु विद्यालयस्य निधानं खलु। इदानीं तव संरक्षणं संवर्धनं तु विद्यालयस्य दायित्वमेव !'

--बहिः आकाशे, सर्वेषां कृष्णमेघानां पिधानं छित्वा पुनरपि दर्शनं दत्तवान्, सः तेजस्वी सूर्यनारायणः!

**-ई-३-३, प्रेम पार्कः, मासूल्कर कालोनी,**
**पिम्परी पुणे, महाराष्ट्रम् -४११००१**

# उत्तरदायित्वम्

-विश्वजित प्रामाणिकः

पूर्वस्यां दिशि दिवाकरः सूर्यः रक्तिमाभया उदितः अभूत्। विहगाः नीडेभ्यः बहिः आगत्य यथेच्छं डयमानाः सन्ति। प्रतिदिनमिव अद्यापि कुक्कुटाः उच्चकण्ठेन प्रातःकालस्य सूचनाम् उद्घोषयन्। कृषकस्य गृहात् अजशावकाः गणशः क्षेत्रं प्रति तृणानि चरितुं गच्छन्तः सन्ति। अनतिदूरे कञ्चन स्वामिनम् अनुगच्छन्त्याः धेन्वाः पृष्ठतः सद्योजातः गोवत्सः गोचरीभूयते। अस्मिन् वयसि अस्य सद्योजातस्य गोवत्सस्य आचरणं समेषामपि मनसि कञ्चन स्फुटं प्रह्लादं जनयति। यदा असौ गोवत्सः तदीयमातुः पृष्ठतः महता उत्साहेन प्रफुल्लितचित्तेन पादचतुष्टयेन लम्फनकूर्दनादि कुर्वन् कदाचित् मातुः समीपं कदाचित् दूरं वा आयाति याति च, तदा आबालवृद्धानां समेषामपि हृदयपटले काचित् नवा स्फूर्तिः जागर्ति। समे अपि मन्दस्मितपूर्वकं तं परीक्षन्ते। धेनुस्वामी अपि तस्मात् चञ्चलः न भवति। सः अपि अनुमनुते गोवत्सस्य कूर्दनादिकम्। तडागस्य निर्मलजले प्लवन्ते हंसाः । ते स्वस्थानात् निर्गत्य पादाभ्यां कथञ्चित् स्वशरीरं प्रणुद्य आनीय तडागघट्टम् उपसृत्य जले आत्मनः सम्प्राप्य शान्तिं लभन्ते । तदा आरभते तेषां स्वाभिलषितं तरणम्। मध्येतडागं विद्यमानस्य वंशदण्डस्य अग्रभागे उपविश्य स्थिरम् एकाग्रचित्तेन मत्स्यं प्रतीक्षते कश्चन मीनरङ्कः। अन्यत्र क्वचित् अपि तस्य दृष्टिः नोपसर्पति। एकत्रैव तस्य लक्ष्यम्। कश्चन मत्स्यः आगच्छेत् कश्चन मत्स्यः आगच्छेत् इति। प्रायशः कश्चन लघुमत्स्यः आगच्छन् स्यात् कारणम् सः मीनरङ्कः स्वग्रीवां पुरतः प्रसार्य झटिति आत्मानम् उड्डीय्य आक्रान्तवान् जले विद्यमानस्य मत्स्यस्योपरि।

हन्त ! मीनरङ्कः सत्यकामस्य मनः हठात् विचलितं सञ्जातम्। अद्यापि सः यथापूर्वं प्रातः पञ्चवादने उत्थाय अध्ययनाय उपविष्टः । तदीयगृहस्य वातायनात् बहिः किञ्चित् पूर्वमेव संघटितायाः घटनायाः सः एव प्रत्यक्षं दर्शकः । तस्य नेत्रयोः पुरस्तात् एव सर्वं क्रमशः घटमानम् आसीत्। प्रतिदिनं सः किञ्चित् समयं यावत् एतत् सर्वं वीक्षते। एतत् सर्वं परिलक्ष्य सः कञ्चन अद्भुतम् आनन्दम् उपभुङ्क्ते । 'एतत् सर्वं भवतु नाम, अधुना मया अध्येतव्यम्' इति निश्चित्य सत्यकामः पुनरपि जीवविद्यायाः सालोकसंश्लेषस्य अध्ययने प्रवृत्तिं प्रादर्शयत् । अर्धहोरानन्तरं सः अल्पहारं समाप्य गणितस्य समाधानाय पुनः प्रावर्तत। नववादनाभ्यन्तरे सत्यकामस्य पितरौ पुत्रस्य अध्ययनपृच्छां कृत्वा गतवन्तौ। अस्मिन् वर्षे सत्यकामः द्वादशकक्षायाः मूलपरीक्षां लेखिष्यति। तदर्थम् अनेन सम्यक् अध्येतव्यम्। यथायथं प्रयत्नः सत्यकामेन करणीयः। किञ्चित् अधिकसमयं यावत् पठित्वा किञ्चित् अधिकं कष्टं वा सोढ्वा उत्तमाङ्कान् सम्प्राप्य विद्यालये प्रथमं स्थानं प्राप्तुं सः निश्चयेन यतिष्यते ।

सत्यकामस्यैव ग्रामे द्वित्राणां गृहाणाम् अनन्तरं विद्यमाने गृहे निवसति सदानन्दः। सत्यकामसदानन्दौ प्रतिवेशिनौ अपिच सहपाठिनौ स्तः। असौ सदानन्दः प्रातः सप्तवादेन उत्थाय दन्तधावनादिकं समाप्य नागदन्ते स्थितात् भोजनपात्रात् ह्यस्तन्यः पञ्चषाः रोटिकाः कंसपरिमितं गुडञ्च स्वीकृत्य अलिन्दे उपाविशत्। अलिन्दस्य अधः पादौ आन्दोलायमानः एकैकं रोटिकाखण्डं छित्त्वा गुडेन सह सम्मिश्रय सानन्दं भोजनपर्व समापयत्। तदनु गृहं प्रविश्य बृहतः पात्रात् मुष्टिपरिमितलाजाः स्वीकृत्य तडागं प्रति आगच्छत्। तडागतीरे स्थित्वा किञ्चित् अधिकप्रयासेन हस्तौ तडागमुद्दिश्य प्रसार्य लाजाः प्राक्षिपत्। तदनन्तरं लाजाः परितः महाकारवन्तः मत्स्याः अवलोकिताः। अधुना सदानन्दस्य मुखे मन्दहासः समुद्भूतः। ते मत्स्याः जले क्रीडन्तः एकैकं भोज्यपदार्थम् एकैकग्रासेन क्रमशः अधिकृतवन्तः। सम्प्रति लाजाः न दृश्यन्ते, मत्स्याः अपि तथैव। ततः प्रत्यागत्य सदानन्दः द्विचक्रिकाम् आरुह्य वेगेन सञ्चालयन् सत्यकामस्य गृहस्य समीपे द्विचक्रिकाकारिकां कतिचन वारान् उच्चैः वादयित्वा ग्रामस्य अन्तः प्राविशत्। तत्र सः मोहनः, सर्वेशः, रमाकान्तः, सञ्जीवः, दीनदयालः इत्यादीनां तस्य प्रियमित्राणां गृहद्वाराणि सम्प्राप्य विद्यालयः गम्यते वा न वेति पृष्ट्वा प्रत्यागमनसमये पुनरपि सत्यकामस्य गृहवातायनस्य समीपे द्विचक्रिकाकारिकाम् उच्चैः संवादयन् तीव्रवेगेन गृहं प्राविशत्।

गृहप्रवेशसमनन्तरं तस्य माता तं दृष्ट्वा अवोचत् – "अपि तव अध्ययनादिकं किमपि नास्ति? प्रातः विलम्बेन उत्थाय उदरं पूर्णं कृत्वा क्व वा गतः आसीः ? गत्वा स्वयमेव अवलोक्य यत् सत्यकामः प्रातः आरभ्य उत्थाय कियत् पठन् अस्ति इति। तं पठन्तं दृष्ट्वा तु किञ्चित् वा अभ्यस्तुं शक्नुयाः। गृहे कस्यापि वस्तुनः अभावः नास्ति इति कारणात् त्वम् आकाशे डयसे इति प्रतिभाति। हन्त! कः वा अयं धूर्तः मया बोध्यते।"

मातुः कटुवचनानि सदानन्दस्य मनसि पीडाम् अजनयन्। सः जननीमुद्दिश्य कटुदृष्ट्या अवलोक्य प्रकोष्ठं प्राविशत्। प्रकोष्ठे उत्पीठिकायाः उपरि द्वादशकक्षायाः कतिचन पुस्तकानि इतस्ततः स्थापितानि आसन्। किं पुस्तकं पठेयम् इति विचिन्तयन् सः केषाञ्चन पुस्तकानां कतिचन पृष्ठानि उद्घाट्य आत्मानं शय्यायाम् अवाहेलयत्। किञ्चित् परं सः पुनरपि निद्रालोकं प्राप्नोत्।

एकहोरानन्तरं जनन्याः कर्कशकण्ठस्वरेण तस्य निद्रा अपगता – "किञ्चित् अपि न लज्जसे? सकृत् पश्य अधुना कः समयः इति। किम् अद्य विद्यालयः न गम्यते? उत्तिष्ठ, त्वरितं स्नात्वा आगच्छ। तावता अहं भोजनं परिवेषयामि।"

सदानन्दः शय्यातः उत्थाय शिरसि किञ्चित् नारिकेलतैलं लेपयन् प्रोञ्छं कटौ दृढं बद्ध्वा दूरात् एव वेगेन धावन् उपरिष्टात् लम्फयित्वा तडागजले अपतत्। तदा मातुः त्वरितं स्नात्वा आगच्छ इति कथनं सः त्वरितमेव व्यस्मरत्। अर्धघण्टां यावत् सम्पूर्णतडागम् अभिव्याप्य सन्तरन् नेत्रे रक्तीकृत्य पुनरपि मातुः आह्वानेन तडागतः उदतिष्ठत्।

सदानन्दः कथञ्चित् भोजनं समाप्य मातुः सकाशात् बलात् विंशतिः रूप्यकाणि स्वीकृत्य

समवस्त्राणि धृत्वा विद्यालयगमनाय प्रस्थितः । पुरतः एव सत्यकामं विद्यालयं गच्छन्तम् अवलोक्य दूरात् आह्वयत्- ''रे सत्यकाम ! तिष्ठ, अहमपि आगच्छामि।''

सत्यकामः उदतरत् -''आम् आगच्छ, तावता अहं पितरौ प्रणम्य आगच्छामि। अत्रैव तिष्ठ, मिलित्वा गच्छेव।''

विद्यालयः समीपे वर्तते इत्यतः एताभ्यां पद्भ्यामेव विद्यालयः गम्यते। सत्यकामः पितरौ प्रणम्य मुख्यमार्गम् आगत्य अपश्यत् यत् सदानन्दः तं प्रतीक्षते इति। सदानन्दम् अवलोक्य सत्यकामः अपृच्छत्- ''अपि त्वं गणिताभ्यासं कृतवान् असि? जीवविद्यामपि कण्ठस्थीकृतवान् असि?''

सदानन्दः हेलया उदतरत्- ''नैव, कः गणिताभ्यासः? का वा जीवविद्या? मम अध्यापकः तु एवं पठितुं नादिष्टवान् । कदाचित् त्वमेव अन्यथा श्रुतवान् स्याः ।''

-'' अहो एवम् किल ! एकस्यामेव कक्षायां तव अध्यापकः अन्यथा सूचयति, मम अध्यापकः च अन्यथा सूचयति। सम्प्रति अवगतं मया। अरे! एकं विषयं वद। त्वं प्रातः द्विचक्रिकया गमनागमनसमये मम गृहस्य वातायनपुरतः आकारिकाम् उच्चैः किमर्थं वादयसि?

-''किं त्वं न जानीहि यत् किमर्थम् अहं तथा आचरामि इति''

-''नैव, कथय किमर्थं त्वं ममैव गृहस्य पुरतः तथा आचरसि।''

-''अरे मम उपस्थितिं सूचयितुम् । विचारय, प्रातः प्रातः अहं कियति आनन्दे संतिष्ठे। अहं नाम्ना सदानन्दः पुनः प्रकृत्या अपि सदानन्दः । किं वा आविष्कुर्यां तावत् पठित्वा। अलम् एतावत। त्वया सह विद्यालयः तु प्रतिदिनं मया गम्यते।''

-''अरे सदानन्द! विना अध्ययनेन प्रतिदिनं विद्यालयं गत्वा कः लाभः ? किमपि न भवति। किञ्चित् वा पठ। नोचेत् वर्षान्ते कथं वा त्वम् उत्तीर्णः भविष्यसि। भवतु नाम अहं कं वा उपदिशामि? यस्य कर्णौ स्तः चेत् अपि बधिरायते।''

- '' सत्यकाम! किञ्चित् तिष्ठ, अहम् आपणात् एकं कन्दुकं क्रीत्वा आनयामि। निमेषद्वयं तिष्ठ केवलम्।''

-'' अस्तु गच्छ, किन्तु शीघ्रं कुरु। विद्यालयस्य समयः जायते।''

सदानन्दः शीघ्रं गत्वा एकं कन्दुकं क्रीत्वा आगतवान्। ततः उभेऽपि मित्रे विद्यालयं प्राप्य कक्षां प्राविशताम्। मध्याह्नात् पूर्वं सत्यकामेन विविधसत्रेषु अध्यापकप्रश्नानाम् उत्तरं यथार्थमेव विहितम्। कक्षायां सदानन्दस्य प्रस्तुतिः सम्यक् नासीदिति कारणात् अध्यापकेभ्यः तर्जनमपि तेन प्राप्तम् । मध्याह्नविरामे विद्यालयक्रीडाङ्गणे क्रिकेटक्रीडास्पर्धा सञ्जाता। तत्र सत्यकामः अपि भागम् अगृहीतम्। क्रीडायां जयं सम्प्राप्य सदानन्दः आगत्य आनन्देन उच्छवासेन सत्यकामम् आलिङ्गितवान्।

अस्मिन् समये मध्याह्नविरामावसानस्य घण्टानादः आकर्णितः । सर्वे अपि छात्राः हस्तपादान् प्रक्षाल्य स्वकक्षाः प्राविश्यन्त ।

विद्यालयात् प्रत्यागत्य सत्यकामः अल्पाहारानन्तरं तत्रात्यबालकैः सह किञ्चित् क्रीडीत्वा हस्तापादौ प्रक्षाल्य अध्येतुं प्रकोष्ठं प्रविष्टवान्।

सायङ्कालः, विहगाः स्वनीडं प्रत्यागच्छन्ति। अजाः तथैव गणशः विचित्रध्वनिं कुर्वाणाः स्वस्वमित्रगृहं प्रत्यागच्छतः सन्ति। किञ्चित् पूर्वमेव काचित् बालिका आगत्य तडागे सञ्चरतः हंसान् विताड्य गृहम् अनयत् क्रमशः सर्वत्र निःशब्दं वातावरणं जायमानम् अस्ति। सर्वेषां गृहेषु दीपाः ज्वलन्तः सन्ति। सर्वतः शङ्खनादः श्रूयते। अस्मिन् समये मार्गस्य दीपालोके दृष्टं यत् सदानन्दः स्कन्धे स्यूतम् आलम्ब्य ललाटे करवस्त्रं बद्ध्वा आनन्देन किमपि हिन्दीगीतं गायन् गृहं प्रत्यागच्छन् अस्ति इति। अहो आश्चर्यम् ! अस्य धूर्तस्य विद्यालयः अधुना समाप्तः ? अयम् एवम् आचरित चेत् अधीते कदा ? इति यदा चिन्तयन् आसीत्, तदा बाह्यात् मात्रा आहूतम् – "सत्य ! एकवारं गच्छ तव पितामहः त्वाम् आह्वयति।"

"अस्तु आगच्छामि" इति सत्यकामः अवदत्।

पितामहस्य गृहं प्रविश्य सन्ध्यारतेः प्रसादं स्वीकृतवान्। पितामहः सत्यकामं दृष्ट्वा तं समीपम् आहूय तस्य मस्तके स्नेहेन आस्फालनम् अकरोत् पितामहः अवदत् "शास्त्रं वदति श्रद्धावान् लभते ज्ञानम्। अतः गच्छ श्रद्धया अध्ययनं कुरु। एकाग्रचित्तेन परीक्षायै सज्जतां कुरु।"

सत्यकामः ततः गत्वा मातुः पुरतः विद्यालयस्य अद्यतनं सर्वं वृत्तान्तं श्रावयित्वा अध्ययनार्थम् उपविष्टः सम्प्रति सत्यकामः तु श्रद्धया अधीयानः अस्ति किन्तु सदानन्दः ?

असौ धनिकपुत्रः सदानन्दः सायंकालात् परं गृहं प्रविश्य मातुः मुखात् कटुवचनानि श्रुत्वा किञ्चित् भुक्त्वा गृहं प्रविश्य श्रान्तः सन् निद्रानवान् । प्रायशः एवमेव प्राचलत् उभयोः दिनचरी। तदनु कतिचन मासाः व्यतीताः अभवन् ।,

अद्य द्वादशकक्षायाः फलप्रकाशः अभवत्। सत्यकामः उत्तमान् अङ्कान सम्प्राप्य विद्यालये प्रथमस्थानं प्राप्तवान् अस्ति। तदर्थं सर्वे अपि सत्यकामम् अभिनन्दन्तः सन्ति। विद्यालयशिक्षकाः गौरवभावम् अनुभवन्ति। महतः परिश्रमस्य फलं सत्यकामेन अधिगतम्। सर्वेषामपि प्रयत्नः सफलीभूतः। सत्यकामः सम्पूर्णविद्यालये द्वादशकक्षायाः परीक्षायां प्रथमस्थानं प्राप्नोत् किन्तु सदानन्दः कथञ्चित् उत्तीर्णः अभवत्।

स्नातकस्तरे उभयोः महाविद्यालयः भिन्नः अभवत्। सत्यकामः तथैव छात्राणाम् अध्ययनं तपः इति पितामहवाक्यं संस्मृत्य एकाग्रचित्तेन अधीयानः अस्ति। षाण्मासिकपरीक्षासु सः सम्यक् एव अङ्कान् प्राप्नोति। सम्प्रति तस्य अध्ययनेच्छा इतोऽपि वर्धिता। अध्ययनार्थं सः अधिकं प्रयतते, अधिकं श्रमं कुरुते। तस्मिन् विश्वासः सञ्जातः यत् सः अवश्यं सम्यक् स्थानं प्राप्स्यति इति ।

एकदा अवकाशदिने अपराह्णे उभयोः मेलने सञ्जाते सति सदानन्दः अपृच्छत् – "अरे त्वम्? कदा आगतः? कथम् असि ? सर्वं कुशलम्?"

सत्यकामः उदतरत् – "सम्यक् एव अस्मि। अहं किञ्चित् पूर्वमेव महाविद्यालयात् आगतवान्। तव श्रावयतु। कथं सर्वं प्रचलति? अध्ययनं सम्यक् प्रचलति? द्वितीयवर्षस्य परीक्षां कथं लिखितवान् ?"

सदानन्दः उक्तवान्– "त्वया सह यदा कदापि मिलामि केवलम् अध्ययनम् अध्ययनम् । अध्ययनेन विना अस्माकं जीवने अन्यत् किमपि नास्ति किम् ? एतावत् अधीत्य अहं किं वा करिष्यामि। त्वं सम्यक् पठेः किन्तु अहमपि तावत् सम्यक् पठेयमिति किमर्थम् आशासे? "

सत्यकामः तं प्रबोधयन् अवोचत् –'अरे इदानीमपि नावगच्छसि चेत् कदा वा अवगमिष्यसि। अस्मिन् वयसि अध्ययनं न करिष्यसि चेत् किं वृद्धवयसि अध्ययनं करिष्यसि। कदा वा तव सुमतिः भविष्यति वद। तव माता वदन्ती आसीत् यत् अस्मिन् वयसि अपि त्वं यथापूर्वमेव आचरसि इति। अधुनापि केवलं भोजन भ्रमणं, क्रीडा इत्यादिकं कुर्वन् एव वृथा कालं यापयसि। कस्यापि कथनं न शृणुयाः, अपि मातुः कथनन्तु अङ्गीकुरु। कियान् स्वप्नः अस्ति तव विषये तस्याः। तव का समस्या? किं तव अध्ययने रुचि नास्ति ? अध्येतुम् इच्छा न भवति ? तर्हि महाविद्यालयं गच्छसि किमर्थम् ? अध्ययनमपि न त्यजसि, महाविद्यालयमपि गच्छसि। अहं वदामि किं त्वं प्रतिदिनं किञ्चित् किञ्चित् अध्येतुं प्रयतस्व, अध्ययनस्य अभ्यासं निर्माहि। तेनैव लाभः भवेत् । जीवने सफलता प्राप्तव्या चेत् सर्वैः अपि यथाकालं कार्यं कर्तव्यम्।"

सदानन्दः किञ्चित् खिन्नतया अवदत्–" त्वम् अस्मिन् विषये एव कथयिष्यसि अथवा अन्यस्मिन् विषये अपि किञ्चित् कथयेः । नोचेत् अहं गच्छामि।"

तस्मिन् दिने सदानन्दस्य मनोभावम् अवगत्य सत्यकामः अध्ययनविषये पुनः बहु किमपि नोक्तवान्। किन्तु अन्यविषयेषु उभयोः विस्तृतचर्चा, हासः परिहासः च अभवत् ।

समयः अतिक्रान्तः। वर्षाणि अतिक्रान्तानि। यदा यदा अवसरः प्राप्तः तदा तदा सत्यकामः सदानन्दं बोधयति स्म। किन्तु कः वा कस्य वार्तां शृणुयात्। प्रथमं तु सः धनिकस्य पुत्रः, अन्यत् सः अध्ययनं व्यतिरिच्य अन्यविषयेषु महान् आसक्तः। सम्प्रति सत्यकामः स्वपरिश्रमबलेन स्नातकस्तरम् उत्तीर्य स्नातकोत्तरस्तरे प्रथमविभागे उत्तमान् अङ्कान् सम्प्राप्य सर्वकारीयविभागे उद्योगमपि प्राप्नोत्। अधुना सः नगरे निवसति । प्रगतवर्षे तस्य विवाहः अपि सञ्जातः । सद्यः तस्य एका सुन्दरी पुत्री अपि सञ्जाता। विशालं गृहम्, नूतनं यानम्, द्वित्राः सेवकाः, गृहस्य पुरतः पुष्पोद्यानम् इत्यादिकं मेलयित्वा सम्प्रति सत्यकामस्य वैभवपूर्णं जीवनम् एतादृशं जीवनं सार्थकजीवनम् इत्यपि कथयितुं शक्यते। स्वप्रयासेन, कौशलेन, कष्टेन, बुद्ध्या, परिश्रमेण, ज्येष्ठानाम् आशीर्वादेन च सत्यकामः एतादृशं सौभाग्यं प्राप्तवान् अस्ति। एकदा सायंकाले सत्यकामः बाल्यकालं स्मरन् आसीत्। हठात् सदानन्दः तस्य मनसि

समुद्भूतः। यावत् अन्तिमं तेन स्मर्यते सः सदानन्दं दृष्टवान् आसीत् अष्टभ्यः वर्षेभ्यः पूर्वम् एकवारम्। तदा तस्य जीवनम् अत्यन्तं कष्टमयम् आसीत्। तदा तस्य पिता दिवङ्गतः। उद्योगः नास्ति, गृहस्य स्थितिः अपि सम्यक् नासीत्। धनाभावः अपि तदानीं वर्तते स्म। तस्य माता अपि कठिनरोगेण आक्रान्ता आसीत्। न जाने तस्य इदानीं का वा स्थितिः स्यात्। अस्मिन् पर्याये पूजावकाशे स्वग्रामं गत्वा अवश्यं तेन सह मेलनीयम् इत्यादिकं सत्यकामः मनसि एकाकी एव चिन्तयन् आसीत्।

दुर्गापूजावकाशे सकुटुम्बं गृहम् आगच्छत् सत्यकामः। सर्वैः सह मिलित्वा महान् आनन्दः अनुभूयते। ग्रामीणाः ज्येष्ठाः तम् अवलोक्य प्रोत्साहयन्ति। ग्राम्यमातरः बाल्यकालात् कीदृशं सत्यकामम् अवालोकयन् इति सोदाहरणं विवृण्वन्ति। काचित् वृद्धा द्वादशकक्षायां प्रथमस्थानप्राप्तेः विषयमपि सकृत् अस्मारयत्। सत्यकामः सर्वान् अपि ज्येष्ठान् प्रणम्य तेषां कुशलक्षेमम् अपृच्छत्। अल्पाहारसमये सत्यकामः सदानन्दस्य विषये मातरम् अपृच्छत्। मातुः सकाशात् सदानन्दस्य विषये इदम् अवगतं यत् सः समीपे क्वचित् इष्टिकागारे कार्यं करोति। बहुवारम् वृत्तिं परिवर्त्य वर्षद्वयं यावत् अत्रैव सः कार्यं कुर्वाणः अस्ति। तस्य माता सम्प्रति किञ्चित् सम्यक् अस्ति। तस्य विवाहः अपि अभूत्। रोहितनाम्ना एकः पुत्रः अपि अस्ति तस्य। सः विद्यालयमपि गन्तुम् आरब्धवान् इति।

सदानन्दस्य जीवनवृत्तं श्रुत्वा सत्यकामस्य मनसि दुःखम् अभवत्। सः चिन्तयितुम् आरब्धवान् यत् सः सदानन्देन सह मेलिष्यति अथवा न। सदानन्देन सह मेलने सत्यपि हानिः नास्ति, अमेलने सत्यपि हानिः नास्ति इति विचिन्त्य सदानन्दस्य गृहं प्रति सः प्रातिष्ठत। तस्य गृहद्वारं प्राप्य आह्वयति् –"सदानन्द! सदानन्द! रे सदानन्द!"

गृहस्य अन्तस्तात् कश्चन शोभनः सुशीलः बालः आगत्य अतिष्ठत्। सः प्रकृत्या शान्तः दृश्यते। काचित् वधूः गृहस्य अन्तस्तात् बहिः आगत्य उदतरत् –"सः इदानी नास्ति। मध्याह्नात् परम् आगमिष्यति।"

सदानन्दः अवदत्– "पितृव्या गृहे नास्ति किम् ?"

आम्, अस्ति। तिष्ठतु आह्वयामि।" इति उक्त्वा सा गृहस्य अन्तः प्रविष्टवती।

तावता सत्यकामः तेन बालेन सह सम्भाषमाणः आसीत्। तस्य नाम किम् अस्ति? सः कदा विद्यालयं गच्छति? विद्यालये किं किं पठति? विद्यालये सः अधिकतया किं कर्तुं वाञ्छति? सः प्रातः किं करोति? इत्यादिकं सत्यकामः अपृच्छत्। तन्मध्ये सः बालकः एकां कवितामपि अश्रावयत्। अस्मिन् समये जीर्णवस्त्रं धृतवती काशमाना सदानन्दस्य माता आगच्छत्। सत्यकामम् अवलोक्य हासमुखेन अपृच्छत् –
"अरे सत्यकामः आगतः किम् ? पुत्र! कथम् असि ? आगच्छ अत्र उपविश। अपि तव सर्वं कुशलम् ?"

सदानन्दः तां प्रणम्य तस्याः कुशलक्षेमम् अपृच्छत्। ततः परं सा स्वकीयदुर्भाग्यस्थितेः विस्तृतवर्णनम् अकरोत्। धनिकस्थिततः महत् दारिद्र्यं तैः कथम् अधिगतमिति विषयं कथयन्ती सा मध्ये

मध्ये अश्रुसिक्ते नेत्रे मार्जयति स्म। बाल्यकालात् एव अध्ययने अरुचिं प्रदर्शयन् जीवने किमपि विशिष्टं कर्तुम् अशक्तः सदानन्दः अन्ततो गत्वा इष्टिकागारे एव कार्यं कुरुते। सम्प्रति पुत्रस्य भविष्यं तु नष्टप्रायं किन्तु माता इतोऽपि अधिकं चिन्तयति पुत्रस्य भविष्यविषये। कदाचित् इदं दारिद्रयमेव तस्याः पौत्रस्य भविष्यं नाशयेत् इत्यादिकं श्रुत्वा सत्याकामस्य मनसि अपि महत् दुःखम् अभवत् । अन्ते सः पौत्रस्य उज्ज्वलभविष्यविषये तां प्रबोध्य अपराह्ने आगमिष्यति इति उक्त्वा आगच्छत्। आगमनसमये सर्वं विचार्य सत्यकामः मनसि एकं दृढं निश्चयम् अकरोत् ।

दारिद्र्यम्......। कस्यचित् शापबलात् दारिद्र्यं केनापि नाधिगम्यते। इदम् अस्माभिः एव अधिक्रियते। दारिद्र्यदूरीकरणाय सर्वा अपि शक्तिः अस्मासु भवति। किन्तु तथापि केषाञ्चित् जनानां जीवनात् एतादृशं दुःसहं दारिद्र्यं नैव दूरङ्गच्छति। तदर्थम् अपरस्मिन् दोषान् आरोप्य किमपि विशिष्टं साधयितुं न शक्यते। दारिद्रयदूरीकरणस्य मूलमन्त्रः अस्माकमेव हस्ते वर्तते। यदा वयं तत् इच्छामः तदैव तत् दूरीगमिष्यति। एतदर्थम् आवश्यकम् सामर्थ्यम्। आवश्यकः कश्चन संकल्पः, कश्चन उत्साहः, कश्चन महान् परिश्रमः, काचित् अविरता प्रेरणा, काचित् इच्छाशक्तिः । एतत् सर्वं यदि अविरततया प्रवर्तेत तर्हि जीवनं सफलताम् अधिगमिष्यति। ईश्वरः सर्वेषु परिमितशक्तिं प्रदाय एव प्रेषितवान् अस्ति। प्राप्तशक्त्या सह किञ्चित् संयोजनमात्रं करणीयम्। तदा जीवनं पूर्णतां प्राप्स्यति। सदानन्दसदृशाः युवकाः यदि यथाकालम् उचितं कार्यम् अकरिष्यन् स्वकर्तव्यञ्च अपालयिष्यन् तर्हि तेषां जीवनं व्यर्थमिति अपख्यातिं न प्राप्स्यत् ।

अपराह्ने शाटिकाद्वयं रोहिताय एकं युतकं पुनश्च सदानन्दाय एकं करांशुकं स्वीकृत्य पुत्र्या सह सत्यकामः सदानन्दस्य गृहस्य समीपं गत्वा आह्वयत् – "सदानन्द! रे सदानन्द!"

अस्मिन् पर्याये सदानन्दः स्वयं बहिः आगत्य सपुत्र सत्यकामं वीक्ष्य आश्चर्यः अभूत् । सत्यकामस्य हस्ते गृहीत्वा अन्तः अनयत् । सत्यकामाय तस्य पुत्र्यै च पानीयं प्राददात् । परस्परं कुशलक्षेमं पृष्ट्वा उभौ अपि बहिः आगतवन्तौ। आरम्भे सत्यकामः एव अपृच्छत् –"अपि कुशलं तव ?"

सदानन्दः खिन्नमुखेन अवदत् – "किं वा कथयेयम् ? किं वा कुशलं किं वा अकुशलमिति अहं किमपि नावगच्छामि। एतावत् वक्तुं शक्नोमि यत् जीवनं महत् कष्टकरं वर्तते इति। सम्प्रति एकाकी न शक्नोमि एतेषां सर्वेषां सुखं कल्पयितुम्। प्रतिदिनं मुष्टिपरिमितम् अन्नं संग्रहीतुमेव महत् कष्टम् अनुभूयते, पुनः अन्यस्य का कथा । तदा एतावत् नावगतवान् यत् अग्रे मम एवं दशा भविष्यति इति। चिन्तय सम्प्रति क्व अहं क्व वा त्वम्। इदानीम् अवगच्छामि जीवने यथाकालम् अध्ययनस्य किं महत्त्वम्। तदा व्यर्थमेव कालं यापितवान्। तव कथनमपि न श्रुतवान्। सदैव आनन्दे रतः आसम् । किन्तु अधुना तस्य प्रभावात् आनन्दः निरानन्दतां प्राप्नोत् । सम्प्रति मनसि एकः एव प्रश्नः उदेति यत् तदा किमर्थं वा अहम् अध्ययनं

न कृतवान् इति। भवतु एतत् सर्वम् इदानीं विचिन्त्य कः लाभः ? तव विषयं श्रावय। कथम् अस्ति तत्र सर्वम् ?''

सत्यकामः अकथयत् - ''मम विषयम् अनन्तरं श्रोष्यसि। आरम्भे कथय यत् तव पुत्रस्य विषये त्वया किं चिन्त्यते अर्थात् तस्य भविष्यविषये।''

सदानन्दः अवदत्- ओ, रोहितस्य विषये। तस्य विषये किं वा चिन्तयामि। यथा मम जीवने अभवत् तथैव तस्य जीवने अपि भवेत्। किन्तु तस्य अध्ययनाय अहं प्रयत्नं करिष्यामि। ''

सत्यकामः अवदत् - ''वाढम्, अहम् एतदेव वक्तुकामः आसम्। तस्य अध्ययनादिविषये त्वम् अवहेलनतां न प्रदर्शय। सः बृद्धिमान् अस्ति पुनः अध्ययने रुचिमपि प्रदर्शयति इति मया श्रुतम्। तस्य सः अध्ययनभावः अस्माभिः रक्षणीयः । अधुना आरभ्य तस्य भविष्यविषये वयं चिन्तयामः चेत् तस्य भविष्यम् उज्ज्वलं भविष्यति। तस्य भावि जीवनम् अस्माकं हस्ते अस्ति। यदि तव अनुमतिः स्यात् तर्हि अहम् एकं विषयं वदेयम्'' इति उक्त्वा सत्यकामः सदानन्दस्य अनुमत्या वक्तुम् आरब्धवान्-'' अष्टकक्षानन्तरम् अहं तव पुत्रं नगरं प्रति स्वीकर्तुम् इच्छामि तत्र अस्माकं गृहस्य पार्श्वे कश्चित् उत्तमविद्यालयः अस्ति। तत्रैव मम पुत्री पठिष्यति। तत्र रोहितः अपि अध्ययनं कुर्यात् । कदाचित्तया सः गृहमपि आगच्छेत्, अथवा त्वमपि पुत्रं द्रष्टुम् आगच्छेः । किन्तु अहं यथा वदिष्यामि तथा सः अध्ययनं करिष्यति। तव इच्छायां सत्यमेव एतत् सर्वं सफली भविष्यति। परन्तु अहं प्रतिजाने यत् तव पुत्रं ममापक्षेया अपि उत्तमं करिष्यामि। तद्विषये चिन्ता मास्तु।''

सत्यकामस्य मुखात् एतत् सर्वम् आकर्ण्य सदानन्दस्य नेत्रे अश्रुसिक्ते सञ्जाते। सः सत्यकामम् आलिङ्ग्य अवदत् - ''त्वमेव मम सन्मित्रम्। बाल्यकाले अपि मां रक्षितुम् इष्टवान् आसीः अधुनापि रक्षितुम् इच्छसि। एवं सम्भविष्यति चेत् मम महान् आनन्दः भविष्यति। अस्मिन् विषये अस्माकं पूर्णानुमतिः अस्ति। तदा अहं श्रद्धया नाधीतवान् इति करणात् अहं कथं वा मम पुत्रस्य अध्ययनाय समीचीनं मार्गदर्शनं कर्तुं शक्नुयाम् । त्वमेव तत् कर्तुं शक्ष्यसि। अध्ययनस्य कारणेन मम जीवने परिवर्तनानि न स्युः नाम, मम पुत्रस्य जीवने तु परिवर्तनानि आगमिष्यन्ति। मम स्वप्नः सफलः नाभवत् नाम, मम पुत्रस्य स्वप्नः तु सफलीभविष्यति। एतेनापि मया बहु प्राप्स्यते, सत्यमेव अनन्तसुखं प्राप्स्यते। तुभ्यम् अहं धन्यवादान् वक्तुं न शक्नोमि किन्तु तव मङ्गलं कामये निश्चप्रचम् । सर्वेषां गृहेषु तवादृशाः पुत्राः जायेरन्।''

तदनन्तरम् उभाभ्यां हसन्मुखेन गृहं प्रविष्टम्। सत्यकामस्य नेत्रयोः पुरतः रक्तिमाभया उदितः दिवाकरः सूर्यः अधुना सदानन्दस्य हृदयपटले उदितः अभूत् ।

**-राष्ट्रिय संस्कृत विद्यापीठम्,**

**तिरुपति, अन्ध्रप्रदेशः -५१७५०२**

# परिवर्तनप्रतीतिः

-डॉ. सुधाकरमिश्रः

आसीदेकः समूहः। समूहे तस्मिन् नाना धर्मावलम्बिनः, नाना प्रकृतिकाः, आचारव्यवहारकुशलाः कार्यं कुर्वन्ति स्म। केचन कर्मसम्पादनपूर्वकं यथारुचि पठन्ति स्म। समूहरूपेण यद्यपि सर्वेषां कार्याणि एकीभूतान्येव परन्त्वेकीभूतेऽपि वैयक्तिकमपि निर्वहन्ति स्म। तेषु मोहनः थामसः इकलाकः एवं क्रीशु इति प्रसिद्धाः अन्ये सहयोगिनश्चासन् । ते सामूहिकचर्चया सह वैयक्तिकमपि परिवेशयन्ति स्म। सर्वे संगठनस्य प्रारम्भे कालेनागच्छन्ति स्म कालेन गच्छन्ति स्म। परस्परं वह्व्यः चर्चाः भवन्ति स्म। तासु चर्चासु गतागतानि पुनरावृत्तानि नाना इतिवृत्तान्यपि अक्षिगोचरी भवन्ति स्म। गतानि बहूनि दिनानि। सामूहिके कार्ये तु तेषां रुचिरासीत् परन्तु कालातिरिक्तं किमपि नास्ति इति कथनानुसारेण विवाहिताः प्रायस्ते जाताः। तर्हि काले गमना गमने यदा कदा नियततामतिरिच्य अनियतताक्रान्तस्थले परिचर्चिता। इदानीं कोऽपि कालेन आगच्छति कोऽपि च अकाले गच्छति। तेषु आसीत् मोहनाख्यः कश्चन नियमबद्धः नियतनियमकष्टाश्रितः। जनानां क्रियाकलापं दृष्ट्वा कान् प्रति सुखी कान् प्रति च दुःखी। आत्मचिन्तितमात्मानमेव श्रावयति स्म। सत्याप्रियस्य वाक्यस्य श्रोता वक्ता च दुर्लभः'' इति सूक्तिरस्ति प्रसिद्धा परन्तु तत्र तादृशी दुर्लभता नासीत्। यतो हि एकेनैव यदि सर्वं नास्ति सिद्धिः सुदुर्लभा'' यदि एक एव सर्वं साधयति तदा तस्य कृते किमपि दुर्लभं न भवति। तर्हि अत्रापि स्वयमेव ब्रवीति स्वयमेव शृणोति। एवं कार्यं कार्यं स पश्यति केचन किञ्चित दिनं यावत् साधुपद्धत्या चालयन्ति चलन्ति, पुनः चन्द्रदिनं यावत् अन्यथा कृत्य चालयन्ति चलन्ति च। **'चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिरिति'** भाग्योक्तं वचनं चरितार्थयन्ति स्म। दर्शं दर्शं स विचारितवान् यत् इदं तु क्रियाकृतपरिवर्तनम्। पुनः स पश्यति यत् केचन पर्वोत्सवादिसमये वस्त्रोपानह्यानस्योतादिकं परिवर्त्य-परिवर्त्य आगच्छन्ति स्म, प्रायः प्रतिवर्षं समानमेव कार्यमासीत्। वार्षिकमिदं दृष्ट्वा स चिन्तिवान् यत् एतत् तु सामान्यं परिवर्तनम्। यच्च परिवर्तनं प्रतिदिनं प्रतिवर्षं षाण्मासिकं, त्रैमासिकं वा भवति तत्सर्वं सामान्यं परिवर्तनमित्याख्यायते। इतोऽपि तस्य मनसि एका महती चिन्ता जाता यत् एकदा सः स्वच्छायाचित्रं स्वसञ्चितच्छायाचित्रमञ्जूषायामपश्यत्। तदा तस्य मनसि व्याप्ता एका नवीना अवधारणा इति। नाहं सः। न सः यः । न यः त्वमिति। रात्रौ अनिद्रां प्राप्य कार्यालये निद्राति। जनाः पृष्टवन्तः किमर्थमद्य भवान् शेते। सः स्वचिन्तितं जनान् श्रावितवान्। श्रुत्वा जनाः हसन्ति तथा कथयन्ति यत् एतत् तु सामान्यं स्वाभाविकं परिवर्तनम्। शङ्कराचार्येणापि प्रोक्तं यत् **''कालः क्रीडति गच्छति आयुः तदपि न मुञ्चति आशा वायुः''** गच्छति इति जगत्। संसरति इति संसारः। परिवर्तनमेव संसारः। इत्यादि रूपेण जनाः बोधितवन्तः। अतः तस्य मनसि शान्तिर्जाता। सः निश्चयं कृतवान् यत् एतत्

तु शरीरकृतं परिवर्तनम्। पुनः एकदा स अत्यन्तैकान्तस्थाने उपविष्टः स्वपरिवारिकं चिन्तनं करोति यत् प्रपितामहः प्रपितामही आस्ताम्। पितरौ आस्ताम्। सहैव आवाम् आस्व। ते सर्वं पश्यन्ति स्म। प्रपितामहः दिस्वर्गप्रदाप्त्यनन्तरं पितरौ तथा अहमपि तेषां सहयोगे आसम्। पुनः तावपि गन्तवन्तौ। इदानीं मम परिवारे दम्पती, गोत्रसंज्ञकाश्च सन्ति। एते सर्वं साधयन्ति। कुर्वन्ति, कारयन्ति च । स चिन्तयन् व्यग्रोऽभवत् तदा पत्नी आगत्य उक्तवती- भोः, अयं तु जगतः परिवर्तनम्। एतत्तु सर्वेषु देशेषु, परिवारेषु, जनेषु च अस्ति। अत्र चिन्ता मास्तु। प्रोक्तञ्च -

**परिवर्तिनि संसारेऽस्मिन् मृतः को वा न जायते।**
**स जातो येन जातेन वंशो याति समुन्नतिम्॥**

इति कान्तोपेशशान्तमनाः सत् स अन्यस्मिन् कर्मणि व्यावृत्तः। पुनः स्पष्टं कृतवान् यत् एतत् तु पारिवारिकं परिवर्तनं जगति सर्वदैव चलति। नास्य कोऽपि नियन्त्रकः।

भोः मित्र ! परिवर्तनस्य नास्ति अन्तः। एकदा स एकं दैवज्ञं दृष्टवान् सः पाञ्चाङ्गादिकं दृष्ट्वा जनानां भारतीयसंस्कृतिसम्मतं षोडशसंस्कारविषयकमुचितानुचितं कालं ज्ञापयति स्म। प्रातःकाले उत्थाय एवं कर्त्तव्यम्। अनन्तरमेवं कर्त्तव्यम्। जनाः तत्काले प्राप्ते तत्तत् कार्यं सम्पादयन्ति स्म। कालश्च समाप्तः कार्यं समाप्तमिति। सः आश्चर्यमनुभवति। अन्यस्मै वदति भोः! सः एतत् कार्यं तस्मिन्काले कृतवान् इदानीं कथं न करोति। सूर्योदयः प्रातर्भवति न निशीथे, इन्दुः उदेति निशायां न दिने तदा चिन्ताकुले मनसि बोधयति वृद्धः भोः! कालकृतमेतत् चाकचिक्यम्। प्रोक्तञ्च मुक्तावल्याम्-

**"जन्यानां जनकः कालः जगतामाश्रयो मतः"।**

तस्मिन्नेव चक्रे स पश्यति आश्चर्यपूर्णं कर्म। यत् यदा बाल्यकालः आसीत् वयं क्रीडामः स्म। अनन्तरमध्यनप्रभावः, पुनः जीविकाकर्मणः प्रयोजनम् तत्रापि एकः अधिकारी, अपरश्च प्रतिपालकः, अन्यश्च संरक्षकः तत्रैवाहमपि। कोऽपि कस्मिन् पदे नियुक्तः, किञ्चित् दिनानन्तरं प्रोन्नतपदं प्राप्तं कृत्वा अन्यद्कर्म पश्यति। यद्यपि सर्वेऽपि मनुष्याः तथापि कथमेवमिति अन्तर्हिते चिन्तने उत्तरमिदं यत् अनुभवानुभूतक्रमजन्यं व्यवहारिकं परिवर्तनमिति।

एवं चलति जीवने आश्चर्यपूर्णमिदं यत् समाजे कोऽपि पठति स्म अनन्तरं पाठयति। अभियन्तृकार्यं सम्पादययति। वैज्ञानिकः भवति। कोऽपि समाजस्य तलस्पर्शिकार्यं करोति। कोऽपि मध्यस्तरीयं कार्यं साधयति। कश्चन् च उच्चस्तरीयं करोति। सर्वेऽपि यद्यपि आरम्भिकजीवने समानरूपेण, समानगुरुभिः, समानज्ञानं प्राप्य उपरि परिवर्तनपूर्णे विषये पृक्ते सति देशसेवां, परिवारसेवां, समाजसेवां, यन्त्रमाध्यमेन, ज्ञानमाध्यमेन, शरीरमाध्यमेन, कलाकलितेन व्यवहारेण जनाः देशविदेशचन्द्रमङ्गलयानादि पर्यन्तं यतन्ते। इदन्तु सामाजिकं परिवर्तनमिति। इदमपि सातत्यपूर्णमिति।

कालोऽपि गच्छति सर्व परिवर्तते। प्राचीन-कालः आसीत् सर्वे अधिकाधिकं कार्यं हस्ताभ्यां कुर्वन्ति स्म। परन्तु शनैःशनैः पाश्चात्यपौरस्त्याभ्यां प्रभावेण जगदिदं यन्त्रयन्त्रायितं जातम्। प्रायः सर्वाण्यपि कार्याणि

यन्त्रैरेव सम्पाद्यते। तच्च यन्त्रं नाना प्रकारकं विषयविभागानुसारेण तेषां परिदर्शनं भवति। ग्रामे-ग्रामे-नगरे च परिवर्तनं दरीदृश्यते। तस्य सर्वस्यापि कारणं यन्त्रमेव। आदौ यन्त्रमासीत् यत् निर्माणे सति तत्र अङ्गानां परिपवर्तनं भवति स्म। परन्तु इदानीं यावद्दिनं पर्यन्तं तच्चलति चलति न चलति चेत् प्रक्षिप्य पुनः नूतनं नीयमानं भवति। प्रायः सर्वेऽपि समाजिकाः यन्त्रमधिकृत्यैव यतन्ते। प्राक्काले एका वार्ता पञ्चदिनेषु, दशदिनेषु इतस्ततः पत्रादिमाध्यमेन आगच्छति गच्छति स्म। परन्तु इदानीं इतः निःसरति विश्वस्मिन् व्यापिता भवति। आदौ कथा मात्रमङ्किता सती गच्छति स्म। साम्प्रतं चित्रपूर्णं साक्षात् वार्ताः भवन्ति। यात्रा विषयेऽपि पूर्वकाले जनाः पादाभ्यां गच्छन्ति स्म। बहुकालः लगति स्म। परन्तु अधुना वायुयानेन, रेलयानेन, बसयानेन जनाः शीघ्रातिशीघ्रं समापयन्ति। एतत्सर्वं वैज्ञानिकं परिवर्तनम्। इदमपि आश्चर्यपूर्णमेव। एतत् सर्वं दर्शं जनाः व्यग्राः, चिन्तिताः, समाजपरिवारदेशपुत्रादिप्रेम-रहिताः चलदूरभाषपृक्ताः, चलचित्रपूर्णाः, व्यजनवातायनादिसम्पृत्ता इति। रोगादिक्षेत्रेऽपि विविधान् रोगान् आक्रान्ताः मानवाः यापयन्ति जीवनम्। तदा स चिन्तकः यत् कुत्र नास्ति परिवर्तनमिति, स पश्यति दार्शनिकीं दृष्टिम्। सांख्योगन्यायवैशेषिकमीमांसावेदान्तादिषडास्तिकदर्शनपूर्णपरिपूरिते समाजे दिग्दर्शनं कुर्मस्तदा सांख्यदृष्ट्या प्रकृतिपुरुषयोः, न्यायवैशेषिकमते परमाणूनां, मीमांसादर्शने कर्मणां, वेदान्तमते परंब्रह्ममाययोः यत् वैशिष्ट्यं तत्र न भवति किमपि परिवर्तनम्। यतो हि परं ब्रह्मेव नित्यं वस्तु अन्यत्सर्वमनित्यम्। परिवर्तनशीलञ्च। अर्थात् दर्शनदृष्टिपूर्णं चिन्तनमेवापरिवर्तनपूर्णमिति एतदेव सत्यम्। सर्वेषु परिवर्तनेषु पुनरावर्तनं परन्तु अन्यतमेषु दार्शनिकपरिवर्तनेषु न पुनरावर्तनं सम्भवति। स्थिरं नाम स्थिरमिति। दार्शनिकपरिवर्तनमेव परिवर्तनं तेन सर्वं परिवर्तनं तस्यां दृष्टौ समाप्तं भवति। भर्तृहरिदर्शनस्यापि वैशिष्ट्यं प्रतिपादितं तत्र तत्त्वस्य पार्थक्यत्वेन एव चिन्तनं करोति उक्तञ्च-

**दर्शनस्यापि यत् तत्त्वं न तद्दर्शने स्थितम्।**
**वस्तु संसर्गरूपेण तदरूपं निरूप्यते॥**

वाक्यपदीयम् वाक्यकाण्डम्।

परन्तु एवं कोऽपि एव चिन्तयति। न सर्वे इति। प्रोक्तञ्च गीतायाम्-

**कश्चित् यतति सिद्धये।**

**-श्रीसीताराम वैदिक आदर्श-**
**संस्कृत महाविद्यालयः**
**७/२ ए.पी.डब्ल्यु रोड़**
**कलकत्ता-७०००३५**

# दिल्ली–संस्कृत–अकादमी

(दिल्ली सर्वकार:)

प्लॉट सं० ५, झण्डेवालानम्, करोलबागः, नव दिल्ली–५

दूरभाष :- 011-23635592, 23689835, 23637798

# संस्कृत–मञ्जरी

(त्रैमासिकी–पत्रिका)

(ISSN-2278-8360)

## सदस्यता–प्रपत्रम्

सदस्यस्य नाम : ..........................................................................................

स्थानसङ्केत:..............................................................................................

.................................................................................पिनकोड:...............................

दूरभाष: (एस०टी०डी० कोडसहित:).........................................................................

कार्यालयस्य सङ्केत: ......................................................................................

.................................................................................पिनकोड:...............................

दूरभाष: (एस०टी०डी० कोडसहित:).........................................................................

ईमेल:.......................................................................................................

सदस्यताशुल्कम् वार्षिकम् – रु० 100
त्रैवार्षिकम् – रु० 300
पञ्चवार्षिकम् – रु० 500

शुल्कप्रेषणप्रकार:- चैकमाध्यमेन (केवलं सीटीएस चैक: स्वीकार्य:) ☐ सं०.................
बैंकड्राफ्टमाध्यमेन ☐ सं०.................
मनिआर्डरमाध्यमेन ☐ सं०.................

(सदस्यस्य हस्ताक्षराणि)

---

**नोट: चैक "दिल्ली संस्कृत अकादमी" के नाम होना चाहिए।**

हस्ताक्षर
अकादमीप्रतिनिधि:

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

(आई.एस.एस.एन.-2347-1565)

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल-मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२३६३५५९२, २३६८१८३५**

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।